भावानुवादसमेत-

शाक्तवादसार-

सहितम्

समूलम्

ईशावास्योपनिषदः

शाक्तभाष्यम्

सर्वतन्त्रस्वतन्त्रनानादर्शनपरमाचार्य-

श्रीपञ्चाननतर्करत्नभट्टाचार्य-विरचितम् ।

तत्पुत्रेण भट्टपल्लीसंस्कृतविद्यालयाध्यक्ष-

कलिकाताविश्वविद्यालयाध्यापक-

श्रीश्रीजीवन्यायतीर्थ-भट्टाचार्येण प्रकाशितम् ।

मूल्यमानकचतुष्टयमात्रम् ।

ईशावास्योपनिषत् ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ।

ओं ईशावास्यमिदꣳ सर्व्वं यत् किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१॥

मात्रा भ्रूण इवाखिलं जगदिदं संच्छाद्य गुप्तं यया
त्यागेन श्रवणादिमार्गविधिना ज्ञाता परं ज्ञानिनाम् ।
निष्कामं समुपासिता क्रतुमतां या मोचयित्री तथा
काम्येनेष्टफलप्रदा भगवतीं दुर्गामहं तां भजे ॥
अम्बापदाम्बुजालम्ब-श्रीपञ्चाननशर्म्मणा ।
ईशोपनिषदां तत्त्वं शक्तिभाष्यं प्रकाश्यते ॥

ब्रह्मसूत्रविचारितं श्रीमद्भगवद्गीतार्थप्रसाधितं सप्तशतीदेवीभाष्यप्रकाशितमर्थजातं यामाश्रित्य प्रवृत्तं तामेव भगवतीं श्रुतिं व्याचिख्यासुराद्यतया पूर्वाचार्य्याभ्युपगतां याजुषकाण्वशाखान्तर्गतामीशोपनिषदमुपतिष्ठमानोऽस्मि । अनया दिशा ब्रह्मसूत्रशक्तिभाष्यसप्तशतीदेवीभाष्यश्रीमद्भगवद्गीताशक्तिभाष्योक्ततत्तदुपनिषद्भागसंहितामन्त्रव्याख्यानेन च सोपनिषत्कश्रुत्यर्थतत्त्वबोधो बुभुत्सूनां भविष्यतीत्याशास्महे । यच्च द्वैतोक्तिरत्नमालाख्ये प्रकरणग्रन्थे ईशाद्युपनिषदां भावार्थो

वर्णितोऽस्माभिस्तन्-न्यायवैशेषिकनयस्य श्रुत्यविरुद्धताप्रदर्शनपरम् । अधिकारि-विशेषाणां तथा भावनयोपासनयापि निःश्रेयसं चरमफलम्, न तु तत्रोपास्य-स्वरूपं सविचारमुपदर्शितं नाप्युपासनमार्गभेदः, तत्प्रपञ्चः शाक्तदर्शन-सिद्धान्तानुवर्त्ती देवीभाष्यशक्तिभाष्यजातेषु वरीवर्त्ति । श्रुतीनामर्थभेदोऽप्यधि-कारिभेदापेक्षी । करुणामयो शास्त्रयोनिर्यथाधिकारं सर्वानेव तारयितुं तथा प्रवृत्ता, यथा व्याख्यानभेदेऽपि तत्तद्बुद्धिगम्यस्वस्वाधिकारानुरूपतदुपदेशानतिक्रमे भवत्येव श्रेय इति । अयमेव मार्गः पुराणशास्त्राणां शैववैष्णवादिमतभेदसमाधानस्य । अत्र च शाक्तसिद्धान्त एव पवर्ण्यते ।

तत्र 'नित्यसंवद्धचिदचिदात्मकं ब्रह्म, तच्छ्रवणवतां यथाधिकारं मननादि-ज्ञानपरिपाको वा निष्कामकर्म्म वा महाशक्तेः कृपाहेतुः, सत्यां तत्कृपायां मुक्तिः' इत्येतदर्थस्योपदेशायेशेति । ईष्टे प्रभवतीति ईट् ईश्वरी देवात्मशक्तिः, तथा वास्यम् आच्छादनीयम्,—किं तदित्याह—जगत्यां पृथिव्यां यत्किञ्च जगद् भूतादिस्वरूपम् इदं सर्व्वम् । तेन द्विविधं हि जगत्, कारणावस्थं कार्य्यावस्थं च तत्र कारणावस्थं जगत् ब्रह्मात्मकमितीडेव, न तु तथा वास्यं भवति, यच्च कार्य्यावस्थं तदेव ईशा-वास्यम्, जगत्यामिति पदं जगतः कार्य्यावस्थत्वग्राहकं न खलु कारणावस्थं जगत् पृथिव्यां प्रतितिष्ठति, स्वमहिमप्रतिष्ठत्वात्तस्याप्रतिष्ठत्वादनाश्रितत्वरूपाद्वा । 'कस्मिन् प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नि' (छा० ७।२४।१) इत्यादि श्रुतेः । अनेन मात्रा भ्रूणस्येव ईशा सर्व्वस्याच्छादनमिति तत्र मातृभावदर्शनम् । वास्यमिति विषयरूपया क्रियया विषयिणो ग्रहणाच्छ्रवणादीनां तादूप्येण लाभः । विषयरूपायां क्रियायां कृत्यप्रत्ययार्थविधेरन्वयासम्भवात्, विषयिपर्य्यवसायित्वे 'श्रोतव्यो मन्तव्यः' इत्यादिविधिवत् तस्याप्यन्वयोपपत्तेः । एतत्फलमाह—तेनेति । त्यक्तेन रागविषयत्वाभाववता तेन कार्य्यावस्थेन जगता हेतुना भुञ्जीथाः सुख-साक्षात्कारं कुर्य्याः, भोगस्य सुखदुःखान्यतरसाक्षात्काररूपतया सुखसाक्षात्कारस्य तद्रूपत्वादतो नात्मनेपद-व्याघातः, भुजोऽनवने इति पाणिनिसूत्रात् । सुखसाधन-तया धनं मा गृधः मा काङ्क्षीः, गर्द्धपदार्थाकाङ्क्षा हि रजोवृत्तिविशेषः, तस्यैवात्र

कुर्व्वन्नेवेह कर्म्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे ॥२॥

प्रतिषेधः, न तु मोक्षोपयोगिन्या देवात्मशक्तिकृपाजन्यायाः श्रवणमननादीच्छायाः, धनमिति लिङ्गात् । एतदुक्तं भवति—द्विविधौ हि रागद्वेषौ महाशक्तिकरुणाविघटित-सामग्रीजन्यौ तद्घटितसामग्रीजन्यौ च । तत्राद्यौ दोषात्मानौ बन्धायैव प्रभवतः, द्वितीयौ च महाशक्तिविभूतिरूपौ मोक्षायापि कल्पेते । स्वित् इति प्रश्ने, कं सुखं तस्य कस्य सुखस्य बृह्मानन्दलाभस्य, कं ब्रह्मेति श्रुतेः, किम् ? धनं किं तादृशसुख-साधनं भवति ? न इत्यर्थः 'अमृतस्य तु नाशास्ति वित्तेन' इति श्रुत्यन्तरात् । एषणा-त्रयविमुक्तो मुनिः सर्वमेव मात्रा भ्रूणवत् परमेश्वर्य्या महाशक्त्यात्मनान्तःस्थापित-मिति श्रुत्यर्थावधारणतन्मननाभ्यां महाशक्तिमात्रालम्बिध्यानादिना सर्वं तदभिन्नं पश्यन् अमृताख्यं सुखं भजत इत्यर्थः । अयं साधनप्रकारो गृहिसाधारणः । न तु सन्न्यासिमात्रनियतः, ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्यन्तर सामान्यतो निर्देशात् । न चेयं श्रुतिः सन्न्यासमेव विदधाति, त्रयो धर्म्मस्कन्धा इत्युपक्रमविरोधात् । अथ पुण्यलोका भवन्तीत्यनेन तत्प्रकरणं परिसमाप्य ब्रह्मसंस्थोऽमृतत्वमेतीति प्रकरणान्तरमिति शङ्कनीयं ब्रह्मसंस्थत्वाभावे पुण्यलोकत्वं ब्रह्मसंस्थत्वे त्वमृतत्व-प्राप्तिरिति विशेषद्वयपरत्वस्य युक्ततया प्रकरणपरिसमाप्तिप्रकरणान्तरारम्भरूप कल्पनाया ज्ञापकाभावात् । जाबालश्रुतिप्राप्तस्य सन्न्यासस्य तु न प्रतिषेधो भवितुमर्हति, तस्मात् सन्न्यासवदतिरिक्ताश्रमसाधारणोऽयं मन्त्रोपदेशः । (विचारितमिदं ब्रह्मसूत्रशक्तिभाष्ये) एतेन ज्ञाननिष्ठोक्ता ॥ १ ॥

अथ कर्म्मनिष्ठोच्यते ।

कुर्व्वन्निति । पश्येम शरदः शतं जीवेम शरदः शतमिति बह्व च याजुषमन्त्र-वर्णावगतजिजीविषां बोधयितुं जिजीविषेच्छतं समा इति सन्न्यासिव्यावृत्त्यर्थम् । न तु तदंशे विधिः, कुर्व्वन्नेव कर्म्माणि एवकारेण फलाभिसन्धिरपाकृतः । एतन्मूलिकैव

असुर्य्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥

गीतोक्तिः 'कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्म्मफलहेतुर्भूः' इत्यादिरूपा। 'एवम्' सार्द्धमन्त्रोक्तं प्रकारद्वयम् 'अस्ति' इति उत्तरक्रियापदमत्रापकर्षणीयम्। 'इतः' प्रकारद्वयाद् 'अन्यथा' प्रकारान्तरेण नास्ति, नास्तीत्यस्य कर्त्तृपदं कमिति, तच्च पूर्व्वमन्त्रादनुकृष्य योग्यत्वाद् विभक्तिविपरिणामेनात्रान्वितम्। कममृताख्यसुखम्, तल्लाभ इति यावत्; कं ब्रह्मेति श्रुतेः। कर्म्मणा मृत्युमृषयो निषेदुरिति श्रुतिविरोधं परिहरति 'न कर्म्म लिप्यते नरे' इति। कर्म्म प्रक्रान्तं फलकामनाशून्यं कर्म्म नरे कर्त्तरि न लिप्यते मृत्युहेतुसम्बन्धविशेषलक्षणलेपनाय न कल्पते। तस्मादियं विद्याया स्तुतिरपि भवति न खल्वविदुषोऽनभिसंहितफलकं कर्म्म सम्पद्यते। परं त्वियं विद्या न निर्विशेषब्रह्मसाक्षात्काररूपा तत्सम्पत्तौ कर्म्मासम्भवात्। निर्विशेषं ब्रह्म श्रुत्या स्वयमुपरिष्टादुपपादयिष्यते। अथ कथमिदं प्रकारद्वयम्, यावता प्रथममन्त्रेण मानसं कर्म्मैव ध्यानरूपमुपदिष्टं द्वितीयेन तस्यैव वा कर्म्मान्तरसाधारण्येन वा नियमरूपत्वमुक्तमिति कर्म्मपरत्वमेवास्य मन्त्रद्वयस्य न तु ज्ञानपरत्वमाद्यस्येति, न च ज्ञानतन्त्रत्वादाद्यस्य ज्ञानपरत्वं द्वितीयस्य कर्म्मतन्त्रत्वात् कर्म्मपरत्वमिति वाच्यम्। आद्यस्य ज्ञानवत् मानसकर्म्मापेक्षत्वेन द्वितीयस्य च ज्ञानापेक्षत्वेन तुल्यत्वात् प्रकारद्वयानुपपत्तितादवस्थ्याद् इति चेन्न; कर्म्माङ्गकज्ञानत्वेन ज्ञानाङ्गककर्म्मत्वेन च प्रकारद्वयोपपत्तेरिति संक्षेपः ॥ २ ॥

एते हि द्वये खल्वात्मपालका भवन्ति, दुःखसागरादुद्धरणादात्मनः, एतदतिरिक्तास्त्वद्य वा कल्पान्तरे वा पुनरावर्त्तमाना दुःखसागरमग्नमात्मानं कुर्वन्तः प्राचीनकर्म्मदशायामुप्तदबीजा आत्महन—इत्युच्यन्ते, तेषामन्धेन तमसावृता अज्ञानपरिपाकभूता असुर्य्या अनित्यसुखयुक्ताः सुखदुःखमया लोकाः संसाराख्याः

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्व्वमर्षत् ।

प्रेत्य गन्तव्या भवन्ति । इत्यन्येषां निन्दया मन्त्रद्वयोक्तविधिद्वयमुपपद्यते । असुर्य्या इति पञ्चमस्वरगर्भपाठो मन्त्रार्थश्च काण्वशाखीयः, क्वचित् शाखान्तरे तु मन्त्रस्यास्य असूर्य्या इति षष्ठस्वरगर्भपाठः, 'असूर्य्या नाम लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिनः' इत्यवैधात्महत्यापातकप्रदर्शकोऽर्थश्च स्मृतिकृद्भिर्महर्षिभिः परिगृहीत इति न कश्चिद् विरोधः, एकस्या एव श्रुतेरधिकारिभेदादर्थभेदस्यापि श्रुतिप्रकाशकषरमात्मनस्तात्पर्य्यविषयत्वाच्च । उव्वटादिकृतभाष्यमाध्यन्दिनशाखायाः पाठान्तरवर्तीयमुपनिषत् काण्वशाखीयेति ज्ञेयम् । अत्रासुर्येत्यस्याक्षरार्थस्तु—असुभिः प्राणैः इन्द्रियै रमन्ते इत्यसुराः ऐन्द्रियकसुखरताः, तेषामिमे इत्यसुर्य्याः लोकाः स्थानानि, जन्मानि वेति ॥ ३ ॥

आत्महन इत्युपक्रान्तस्यात्मनस्तत्त्वमाह, अनेजदिति, अनेजत, न एजत् कम्पमानम् अचलमित्यर्थः, एकम् अद्वितीयम् एककार्य्यानुकूलनित्यसत्तावद्वृत्तिभेदाप्रतियोगि, सा च सत्ता चिदचिदुभयपर्याप्ता, चित् नित्यचैतन्यं पुरुष इत्यपि संज्ञायते, अचित् त्रिगुणात्मिका मूलप्रकृतिरिति कापिलसंज्ञा, उभयत्ववत्तदुभय पर्य्याप्ता सत्तोभयवृत्तिः न त्वेकत्रेति । मनसो जवीयो मनसः आहङ्कारिकादन्तःकरणाद् अन्तःकरणसामान्याद्वा वेगवत्तरम्, मनोऽपि वेगवत् इदं च वेगवत्तरम्, मनस उत्पत्तेः पूर्वं लयात्परमपि कारणीभूतप्रकृतिरूपांशावच्छेदेन रजसश्चलस्वभावस्य वेगसत्त्वात् । देवा इन्द्रियाणि पूर्वमर्षत् पूर्वं गतिमत् एनत् आत्मस्वरूपं तत्त्वं न आप्नुवन्, तेषामुत्पत्तेः पूर्वं नित्यस्य तस्य सर्वगतत्वात्, इन्द्रियाविषयदेशे तत् सत्त्वाच्च । तिष्ठत् गतिहीनं चिदवच्छेदेनाचलं धावतः वेगेन गच्छतः अन्यान् एकान्तेनाभेदशून्यान् कार्य्यभूतान् मनोमातरिश्वादीन् अत्येति अतिक्रम्य गच्छति मनो मातरिश्वादिगत्यविषयेषु रजोवृत्तेरुदयात् । तस्मिन्, प्रतिबिम्बरूपे इति यावत् मातरिश्वा वायुः,

तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥४॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्व्वस्य तदु सर्व्वस्यास्य बाह्यतः ॥५॥

मुख्यप्राणभूतप्रज्ञावृत्तिनियन्त्रितत्वात् प्राणशब्दलक्षितः, अपः कर्म्माणि दधाति, आदधाति, आत्मा खल्वेकोऽपि द्विधा व्यपदिश्यते,—चिदचिदुभयात्मिका शक्तिः शारीरश्चेति, तत्र सा शक्तिः ब्रह्मेति परमात्मेति अत्तेति ईडिति परदेवतेति, ब्रह्मेति परमेश्वर इति चैवमादिनामभिर्व्यपदिश्यते, शारीरश्च तत्कार्य्यभूतबुद्धि तत्त्वादिप्रतिबिम्बितं चैतन्यं स्वोपादानके बुद्धितत्त्वे चिदचिदुभयात्मकब्रह्मणोऽचिदंशस्य प्रतिबिम्बासम्भवात्, नहि भवति दर्पणे तत्सजातीयस्य तदुपादानस्य प्रतिबिम्बपातः, भवति तु तद्विजातीयस्य सूर्य्यादेः । तस्मादचित् प्रतिविम्बितं चैतन्यमेव शारीरः, तत्र ब्रह्मणो वास्तवमनन्यत्वं प्रतिबिम्बे बिम्बानतिरेकाद्बुद्धितत्त्वरूपोपाधौ च स्वोपादानादनन्यत्वात्, घटादाविव मृदः । इत्येकात्मसिद्धिः । शरीरे चेष्टात्मककर्म्मसम्बन्धः प्राणसम्बन्धात् । प्राणसम्बन्धश्चोपाधिसम्बन्धप्रयुक्तः, तथापि चेष्टात्मककर्म्मणि प्राणवायुप्रयुक्तत्वस्य लोकव्यवहारसिद्धतया तस्मिन्नपो मातरिश्वा दधातीत्युक्तम् । मुख्यः प्राणस्तु न वायुः प्राणोऽस्मि प्रज्ञात्मेति श्रुतेः, न वायुक्रिये इति ब्रह्मसूत्राच्च । तद्भाष्ये प्रपञ्चितं चैतदस्माभिः ॥ ४ ॥

एतदेव स्पष्टयति—तदिति । एजनानेजने प्रागुक्तावच्छेदकभेदेन, दूरान्तिकादिवृत्तित्वं च सर्वगतत्वात् एतन्निर्विशेषब्रह्मस्वरूपमात्मपदार्थः प्रथमः । उ इत्यनुकम्पायाम्, बाह्यतः प्रतिमातीर्थादिसाधारणबाह्यवस्तुषु तदवृत्तित्वम् अनुकम्पया भक्तान् प्रति कृपयेति भावः । इदं हि सविशेषब्रह्मस्वरूपं द्वितीयः एकेन ब्रह्मत्वेन रूपेण द्वयोरेतयोरात्मपदार्थतया संग्रहः ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥

स पर्य्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳ शुद्धमपापविद्धम् ।

निर्विशेषब्रह्मज्ञाने फलं दर्शयति, यस्त्विति । सर्वभूतान्यात्मनोऽव्यतिरेकेण पश्यतः, तद्दर्शनफलं विजुगुप्साया हेयत्वबुद्धेरभावः समदृष्टिरैक्यदृष्टिर्भवति ॥ ६ ॥

एवं दृष्टेः फलमाह—यस्मिन्निति । यस्मिन् काले सर्वमात्मैवाभूत्, आत्मनोऽन्यन्न किञ्चिदभूत् । विजानतः तादृशयथार्थज्ञानवतः पुरुषस्य तस्मिन्नेव काले मोहाभावस्तद्वतश्च दुःखनिवृत्तिरेकत्वदर्शिनः ॥ ७ ॥

सविशेषब्रह्मकथनमुपासनार्थं तत्र, न तस्य प्रतिमा अस्तीति श्रुतिविरोधापत्त्या प्रतिमाया असम्भव इत्याशङ्कायां निराकारस्य ब्रह्मणो यादृच्छिकप्रतिमाकल्पननिषेधे श्रुतेस्तात्पर्य्यं पूर्वापरानुरोधेन तच्छ्रुतेर्निराकारब्रह्मविषयत्वादिति भावमाविष्कुर्वन् मन्त्रो ब्रह्मणः साकारत्वमुपासनविशेषार्थमुपपादयति स इति । स इति तत्पदोपादानात् उत्तरार्द्धे य इत्यस्य लाभः, यत्तदोर्नित्यसंबन्धात् । यः कविः क्रान्तदर्शी सर्वदृक्, 'नान्योऽतोऽस्ति द्रष्टा' इति श्रुतेः, मनीषी मनस ईषिता अन्तर्य्यामी, अन्तर्य्याम्यमृत इति श्रुतेः, परिभूः परि सर्वेषामुपरि भवति सर्वमु रज उपर्य्युपर्य्येष तपतीति श्रुतेः स्वयं भवति न तु कश्चित्तस्य भावयितान्य इत्यर्थः, एष देवो विश्वकर्म्मेति श्रुतेः । शाश्वतीभ्यः नित्याभ्यः संवत्सरेभ्यः प्रजापतिभ्यः संवतसरो वै प्रजापतिरिति श्रुतेः, याथातथ्यतः याथातथ्येन अर्थान् कर्म्माणि व्यदधात् संव्यदधात्

कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥

विभेजे, आधिकारिकपुरुषाणां यथाधिकारं कर्म्मविभजनं विश्वाधिपलक्षणम्, विश्वाधिपः परमात्मा शुक्रम् अग्निवर्णम् अव्रणम्—अक्षतम्, अस्नाविरं शिरासन्धानरहितं शुद्धं रजोवीर्य्यादिसम्बन्धहीनतया पवित्रम् अपापविद्धम्—जीवदेहवत् धर्म्माधर्म्मजन्यत्वविरहेण न पापविद्धम् अधर्म्मसम्बन्धशून्यम् अकायम् कायसदृशम् अब्राह्मण इतिवत् नञः सादृश्यार्थकत्वात्, जीवकायसदृशं कायं पर्य्यगात्, परिगृहीतवान्, अद्रिजा ऋतं बृहदिति मन्त्रवर्णात्। 'तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्म्मफलेषु जुष्टाम्। दुर्गां देवीं शरणमहं प्रपद्ये' इति बह्वृच परिशेषादियं मूर्त्तिर्दुर्गाया इति गम्यते। जीवकायसादृश्यं करणचरणादिमत्त्वेन तद्गतभूयोधर्म्मत्वम्, तद्भिन्नत्वं वैशेष्येण वेदितव्यम्। वैशेष्यं विशेषः, स च जीवशरीरवैलक्षण्यं जीवशरीरं हि यस्य शरीरं तदीयप्राक्तनधर्म्माधर्म्माकृष्टभूतमात्रया जन्यते, आयुर्भोगावपि तदीय धर्म्माधर्म्मजन्यौ, दुर्गाशरीरं न तथाविधम्, भक्तानुग्रहेण तत्स्वीकारात्। इत्थं यदा यदा बाधा दानवोत्था भविष्यति। तदा तदावतीर्य्याहं करिष्याम्यरिसंक्षयमिति सप्तशतीस्मृतिरनेन मन्त्रेणानुगृह्यते। परमात्मनो विग्रह ग्रहणे मन्त्रान्तरमपि यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति तथाचैवमादिदेहस्य प्रतिमा श्रुत्या न निषिध्यते। या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती सा भूतेभिर्व्यजायत इति। पुरमेकादशद्वारमजस्यावक्रचेतसः अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते। एतद्वै तत्॥ इत्यादि मन्त्रा यजुरथर्वादिसंहितामन्त्राश्च प्रतिमायां प्रमाणभूता द्रष्टव्याः। तदर्थविचारश्च ब्रह्मसूत्रशक्तिभाष्येऽनुसन्धेयः। अत एवास्मिन् मन्त्रे लिङ्गव्यत्यासकल्पनसाहसमपि नास्तीति तत्त्वम्॥ ८॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥९॥
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

ब्रह्मज्ञानमुपासनापर्य्यवसायीत्युपदिशन् ब्रह्मज्ञानं परिष्करोति—अन्धमिति । यद्यपि सर्वमेव, यस्य कस्यचिदुपासनमपि परमार्थतो ब्रह्मोपासनमेव, तथापि विशेषोऽस्ति, यतः ये साधका अविचारचितं प्रतिमादिकं किञ्चित् सावधारणमिदमेव ब्रह्मेति बुद्धिसहकारेणोपासते ते अन्धं तमः ज्ञानदृष्टिनिरोधकमज्ञानं तत् कार्य्यं संसारं प्रविशन्ति प्रपद्यन्ते, न ततो मुच्यन्ते, ये विद्यायां चिन्मात्रे रताः चिदचिदुभयात्मकब्रह्मज्ञानविरहिताः, ते ततः तेभ्यः भूयश्च अधिकतर मिव तमः प्रविशन्तीति पूर्वेणान्वयः । अत्र इवशब्दस्तमसो भूयस्त्वस्य सूचक उत्प्रेक्षां बोधयति, एते खलु ज्ञानवन्तो मोक्षद्वारमागता अपि ततो विभ्रष्टा इत्यधिक्षेप उत्प्रेक्षया व्यज्यते । चिन्मात्रपरिज्ञानवतश्चिदचिदात्मकब्रह्मपरिज्ञानं सुघटमिति तस्य मोक्षद्वारत्वं वेदितव्यम् ॥ ९ ॥

इममर्थं संवादतयोपदर्शयति, अन्यदिति । विद्यया देवलोकः इति श्रुतेर्देवलोकाख्यः संसारो विद्याफलम्, 'कर्म्मणा पितृलोकः' इतिश्रुतेः अविद्यया कर्म्मणा पितृलोकाख्यः संसार इत्याहुः । एतदेवास्मदुपदेष्टृधीराणां शुश्रुम, तेभ्यः श्रुतवन्तो वयम् । विद्याशब्दाज्ज्ञानमात्रलाभाच्चितः प्राप्तिः कर्म्म पराविद्यापदेनान्योन्यसहवृत्तीनां गुणानामन्यतमस्य रजसो लाभात् त्रिगुणात्मिकाचितो लाभ इति, पूर्व्वमन्त्र संवादी मन्त्रोऽयमिति ध्येयम् ॥ १० ॥

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥११॥

निर्णयमाह विद्यामिति, यः विद्यां चितम् अविद्याम् अचितं सहवेद नित्यसम्बद्धतया जानन्नुपास्ते उपासत इति प्रक्रम लिङ्गात्, सः अविद्यया निखिलजगदुपादानेन तदंशभूताचित्स्वरूपेण मृत्युं स्वस्य परिच्छिन्नत्वमोहं—मृत्युहेतुत्वात् मृत्युं तीर्त्वा विद्यया चिता अमृतं मोक्षमश्नुते व्याप्नोति, सन्नपि स्वभाविकमोक्षः परिच्छिन्नत्वमोहेनावरणादसन्निवासीत् आवरणात्यये प्रकाशमान आत्मना व्याप्तो भवति । परिच्छिन्नत्वमोहश्च स्थूलशरीरे लिङ्गशरीरे वा अहमित्यभिमानः, परशरीरयोश्च नाहमिति निश्चयः । येन रागद्वेषावुत्पद्येते । स्वस्य सर्वोपादानादनन्यत्वनिश्चये, घटादेः मृन्मयत्ववत् स्वमेव सर्वत्र निश्चितवतोऽस्य संसारे साक्षात् हेतुभूता परिच्छिन्नत्वमोहनिवृत्तिर्भवति, विलीयेते च रागद्वेषाविति । अत्र विद्याशब्दोपादानं विद्यापदार्थसाकार ब्रह्मणः सूचकमपि, तेन विद्यापदार्थकालीदुर्गाद्युपासकानां तत्कृपया मोक्ष इति रहस्यम् । न ह्याकारतदभावकृतो भवति ब्रह्मभेदः, दृश्यतेऽपि लोके कुण्डलतदभावाभ्यां न खलु भवति देवदत्तभेदः, तस्मात् निर्विशेषब्रह्मोपासकानां तत्कृपया भवति मोक्षः । ननु 'तमेव विदित्वातिमृत्युमेति' इतिश्रुतेर्ज्ञानस्यैव मोक्षहेतुत्वप्राप्त्या तत्कृपाया नास्त्येवोपयोग इति चेन्न—तत्कृपाविरहितानां ज्ञानस्यानुत्पत्तेः, 'यमेवैष वृणुते तेन लभ्यः' इति काठकमन्त्रवर्णात्, अलाप्युपासनलिङ्गात्, प्रार्थनामन्त्रस्याग्रे वर्त्तमानत्वाच्च । भगवान् कृष्णद्वैपायनो वेदव्यासो मन्त्रमिममेतदर्थकतयैव शिष्टपरम्पराप्राप्तमाश्रित्य सप्तशत्यां प्रावोचत् सा विद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरीति महर्षिमेधसो वचने महाविद्या महामोहा चेति तत्रैव ब्रह्मकृतस्तुताविति । तस्माच्चिदचिदात्मकब्रह्मोपासनं कर्त्तव्यं तच्च यथाधिकारं निर्विशेषगोचरं वा सविशेषदुर्गादिगोचरं वेति संक्षेपः ॥ ११ ॥

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते ।
ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥१२॥
अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३॥

संभूतिः सम्यक्सत्ता अपरिणामिनी सत्तेत्यर्थः, असम्भूतिः तदन्या सत्ता परिणामिनी सत्ता, नित्यसंबद्धचिदचिदात्मकब्रह्मणश्चिदंशेऽपरिणामिनी सत्ता अचिदंशे परिणामिनी सत्ता चेति सत्ताद्वयं नित्यमिति प्राप्तम् । ये असम्भूतिं, असम्भूतिमात्रम् परिणामिसत्तामात्रमाश्रित्योपासते तेऽन्धं तमः संसारं प्रविशन्ति ये च सम्भूतिमपरिणामिसत्तामात्रमाश्रित्योपासते ते भूय एव तमः, इति व्याख्यातपूर्वम् । धर्म्मिधर्म्मयोः कथञ्चिद्भेदादरेण पृथगुपदेशः ॥ १२ ॥

तस्मादुपास्यस्वरूपमुपदेष्टुमुपक्रमते—अन्यदिति, यदुपास्यं तत्सम्भवात् सम्भूतेरन्यदाहुः, ननु तर्हि असम्भूतिमिति प्राप्तमित्याशङ्क्याह असम्भवात् परिणामिसत्तावतोऽन्यत् तदिति त एवाहुः, तथा हि नासदासीन्नो सदासीदिति बह्वृचनासदीयसूक्तमन्त्रवर्णाः । वयम् इति एवं शुश्रुम. नोऽस्मान् ये विचचक्षिरे व्याख्यातवन्तस्तेषां धीराणां तेभ्यो धीरेभ्य इत्यर्थः सम्बन्धसामान्ये षष्ठी, धीराणां वचनादित्यध्याहारो वा । अन्यदाहुर्विद्ययेति पूर्वोक्तमन्त्रस्यैतत्तुल्यार्थकताया युक्तत्वेन विद्ययेति पञ्चमीस्थाने छान्दसी तृतीयाविभक्तिः, माध्यन्दिनशाखायां च तथैव पाठः, अन्यदाहुर्विद्याया अन्यदाहुरविद्याया इति । यद् विद्याया अन्यत, यच्चाविद्याया अन्यत तदुपास्यमित्यर्थः, किं तदित्याकाङ्क्षायां विद्यां चाविद्यां चेति मन्त्रमाहेति दशममन्त्रार्थो वा वेदितव्यः ॥ १३ ॥

सम्भूतिम् अपरिणामिनित्यसत्तां विनाशं परिणामिसत्तां सह एकाधिकरणवृत्ति यो वेद स विनाशेन परिणामिसत्तया सर्वोपादानभूतया मृत्युं परिच्छिन्नत्वमोहमित्यादि व्याख्यातपूर्वम् । ब्रह्मणश्चिदचिदात्मकत्वात् एकाधिकरणे ब्रह्मणि

सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥१४॥
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्म्माय दृष्टये ॥१५॥

द्वे एव सत्ते सह भवतः. ब्रह्म चैककार्य्यानुकूलनित्यसत्तापर्य्याप्त्यधिकरणमित्युक्तम्, तद्धि न सम्भूतिमात्रवत् नाप्यसम्भूतिमात्रवत् । असम्भूतिविनाशयोरेकार्थकत्वमत्र ज्ञेयम्, परिणामे धर्म्मिणो विनाशाभावेऽपि धर्म्मस्य विनाशात् विनाशसंज्ञा नानुपपन्ना । नित्यत्वं च धर्म्मिणो विनाशाभावादित्यवधेयम् ॥ १४ ॥

ईशावास्यमित्युपक्रमे मा गृध इत्युक्तं स खलु गर्द्धाभावः कथं भवति ? गर्द्धाभावाय शक्त्युपासकानां शक्तिकृपा यदि जायेत ततो गर्द्धाभावः, तद्वतां तदुपासकानां तदीयकृपाविशेषेण तत्साक्षात्कारादिह लोके भुक्तिरथवान्यादृशकृपया ब्रह्मलोकप्राप्तिस्तत्रैव ब्रह्मसाक्षात्कारान्मुक्तिरित्येतदुपपादका मन्त्रा हिरण्मयेनेत्यादयश्चत्वारः, सत्यस्य तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति (छा०) श्रुत्यन्तरोक्तनिर्वचनस्य निर्विशेषब्रह्मणो वा सतीति नाम्ना प्रसिद्धस्य साकारब्रह्मणो वा मुखं निर्विशेषपक्षे मुख्यस्वरूप साकारपक्षे वदनकमलं हिरण्मयेन पात्रेण स्वर्णपात्रेण पिहितम्, स्वर्णपात्रलोभेन भ्रमतां तन्मुखदिदृक्षैव न जायते यदि वा कथञ्चिद्दिदृक्षा स्वर्णपात्रलिप्सया प्रतिहन्यते, दृष्टिरपि तेषां स्वर्णपात्रे निबद्धा न तन्मुखाभिमुखी भवतीति तन्मुखं तेनाऽऽच्छाद्यते, हिरण्मयपात्रमिति प्रधानतयानिर्देशो ध्यानप्रतिबन्धकमात्रबोधनाय, हे पूषन्, पुष्टिकर्तः शक्तिशब्देनोच्यमान ब्रह्मन्,—तत् हिरण्मयपात्रं त्वमपावृणु उद्घाटय गर्द्धपथापसारय, वैराग्यं जनयेति यावत् सत्यधर्म्मो यः तदर्थम्, कोऽसौ सत्यधर्म्मः ? दृष्टिः, तद्दर्शनं, स्मृतिरपि अथं तु परमो धर्म्मो यद्योगेनात्मदर्शनमिति सत्यधर्म्मत्वेन प्रसिद्धायै तदीयदृष्टये तद्दर्शनाय । प्रार्थनमिदमुपासनस्य कश्चित् प्रकारः ॥ १५ ॥

पूषन्नेकर्षे यम सूर्य्य प्राजापत्य व्यूह रश्मीन् समूह ।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥

एवमुपासनजनितशक्तिर्ब्रह्मकृपया—समुत्पन्नसत्त्वशुद्धेरात्मनि ब्रह्माभेदं याथार्थ्येन बुध्यमानस्य तदापरोक्ष्यहेतुर्ब्रह्मकृपालाभायोपासनमन्त्रः पूषन्नित्यादि-द्वितीयः, अस्यार्थः हे पूषन् पालक, हे एकर्षे, एको मुख्यः ऋषिस्तत्त्वदर्शी यः सर्वज्ञः सर्वविदिति श्रुतेः, नान्योतोऽस्ति द्रष्टेति श्रुतेश्च, हे यम, यमयितः, यः पृथिव्यां तिष्ठन् इत्युपक्रमया पृथिव्या अन्तरो यमयतीत्यादिश्रुत्या प्रतिपादितान्नियमन कर्तृत्वात्, भीषास्माद् वातः पवत इति श्रुत्या वातादिकर्म्मनियन्तृत्वाद्वा, सूर्य्य इति सम्बोधनपदमधिष्ठानाभिप्रायेण तदालम्बनोपासनबोधकम्, अथवा षुर ऐश्वर्य्यदीप्त्योरिति धातोरुत्पन्नत्वात्, एष सर्वेश्वरः इति तच्छुभ्रं ज्योतिषां ज्योतिरिति च श्रुत्या प्रतिपादितार्थम्, प्राजापत्य प्रजापतिकर्म्मस्वरूप, व्यदधाच्छाश्वतीभ्यः समाभ्य इत्यत्रैवाम्नानात्, हेतुहेतुमतोरभेदोपचारेणात्र तथा वचनात्, वस्तुतस्तु कर्म्मणां रजोगुणात्मकत्वात्, लिगुणाया अचितोऽनतिरेकेण चिदचिदुभयात्मकस्य ब्रह्मणस्तत्स्वरूपत्वात् प्राजापत्येति पत्यन्त पुरोहितेभ्यो यक् इति पाणिनीयस्मरणेन तत्पदसिद्धेः, रश्मीन् बहिःप्रयातान् किरणान् व्यूह एकत्र मेलय, तेजः दृष्टिप्रतिघातिभौतिकाधिष्ठानस्थं ज्योतिः समूह उपसंहर, यत्ते कल्याणतमं रूपं तत् ते तव कृपयेति पदमध्याहार्य्यं योग्यतया द्वारमित्युक्तेपिधेहीतिवदन्यथा द्वितीयं ते इति पदं व्यर्थं स्यात् । कल्याणतममिति निर्विशेषोपासकानां निर्विशेषं चिदचिदात्मकरूपम् । ननु कथमस्य निर्विशेषत्वमचिता विशेषादिति चेन्न चिन्मात्रस्य निर्विशेषतायाः सर्वैरभ्युपगमात्, आत्मघटयोर्नात्मत्वमिति प्रतीतिवत् चिदचिदुभयं न विशेषवदितिप्रत्ययान्निर्विशेषत्वसिद्धेः आकारादिना परिच्छिन्नत्वस्य

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ओं क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥१७॥
अग्ने नय सुपथा राये अस्मान् देव विश्वानि

वा विशेषपदार्थत्वात् । साकारब्रह्मोपासकानां कल्याणतमं रूपं दुर्गात्रिपुरसुन्दर्य्यादि । इत्येवं मन्त्रकृतोपासनया लब्धब्रह्मकृपाप्रकर्षः, यथा प्रत्यक्षमाप्नोति, मन्त्र एवान्तिमांशेन तदामनति योऽसावसौ पुरुषः सोऽहमस्मीति । पुरि शयनात् पुरुष इति, अचिदेव पूः, तत्र शयानः तया नित्यसम्बद्धः, चित्स्वरूप आत्मा । तस्य प्राकृतचक्षुषा दर्शनायोग्यत्वमेकेनासौ-पदेनोक्तम् अपरेण चन्द्रादित्यमण्डलालम्बनोपासनागम्यत्वद्योतनाय, तदधिष्ठानत्वञ्च । सोऽहमस्मीति प्रत्यभिज्ञा साक्षात्काररूपेति ध्येयम् ॥ १६ ॥

ज्ञाननिष्ठानां फलमुक्त्वा कर्म्मनिष्ठानां तदाह—वायुरिति, ओं = हे परमार्थतो ब्रह्मस्वरूप, क्रतो = क्रतुकर्त्तृत्वात् क्रतुपदवाच्यः तत्सम्बोधने संकल्पः क्रतुरिति श्रुतेः, हे शारीर ! इत्यर्थः, वायुः = प्रज्ञास्वरूपप्राणस्य प्राणनादिप्रयत्नाधीनत्वात् प्राणशब्देन व्यवह्रियमाणोऽध्यात्मवायुः, अनिलम् अधिभूतवायुं गत इति शेषः, तत् स्मर इत्युरार्द्धस्थक्रियापदेनान्वयः, भस्मान्तं शरीरं स्मर, कृतं प्राक्तनं कर्म्म स्मर, क्रतो स्मर कृतं स्मरेति द्विरुपन्यासः स्मरणस्यावश्यकत्वसूचनाय । प्राणवायुस्थूलशरीरे अनित्ये, त्वं तु नित्यः, कृतेन कर्म्मणा जातिस्मरत्वं ते जातमिति कर्म्मस्तुतिः । श्रुत्यन्तरीयस्य ओं क्रतो स्मर इत्यस्यार्थान्तरं तु प्रकरणानुपूर्व्यादिभेदादविरुद्धम् ॥ १७ ॥

तादृशकर्म्मणा चित्तशुद्धौ कर्म्मनिष्ठः परमेश्वरकृपालाभाय यथा वन्देत तदाह—अग्न इति ब्रह्मणः सम्बोधनम्, अग्रणीत्वधर्म्मयोगात् सर्वेषामेव सार्थकशब्दानां ब्रह्मणि शक्तत्वस्य शक्तिभाष्ये सिद्धान्ततत्वात्, एकं सद्विप्रा बहुधा

वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

ओं पूर्णमद इत्यादिः ।

ओं शान्तिः शान्तिः शान्तिः ।

इति शुक्लयजुर्वेदस्य काण्वशाखीयेशावास्योपनिषत्
समाप्ता ।

वदन्त्यग्निं यमं मातरिश्वानमाहुरिति बह्वृचमन्त्रवर्णात्, तदेवाग्निस्तदादित्यस्तदापस्तदु चन्द्रमाः, तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः (श्वेता) रिति मन्त्रवर्णाच्च । अस्मान् नय ब्रह्मलोकं प्रापय, सुपथा शोभनेन पुनरावृत्तिरहितेन पथा अर्चिरादिमार्गेण । राये = कर्म्मफलाय = मुक्तये, मुक्तेः फलत्वं च क्षैमम्, प्रतिबन्धनिवृत्तिद्वारकप्रकाशरूपम्, अतएव विद्ययाऽमृतमश्नुते इति पुरस्त्यमन्त्रे तृतीयोपदेशः । हे देव स्वप्रकाश, विश्वानि सर्वाणि वयुनानि कर्म्माणि विद्वान् जानन् सर्वज्ञत्वादित्याशयः, युयोधि विनाशय अस्मत् = मत्तः, जुहुराणं = गतागतिहेतुतया कुटिलम्, एनः पापम्, एतदनुरूपभवत्कृपालाभानुकूलसपर्य्याचरणासमर्था वयं ते तुभ्यं भूयिष्ठां बहुतरां नमउक्तिं प्रणामवचनमात्रं विधेम विदध्याम, कुर्य्याम कुर्म्मः । ननु सप्तशत्यादिस्मृतिषु व्याख्यातासु विफलमिदमुपनिषद्व्याख्यानम्, स्वतः प्रमाणत्वादेतद् व्याख्यानं युक्तम् इति चेत् कथमुपनिषदः स्वतःप्रमाणम्, न च महाशक्तिरूपपरब्रह्मणोऽप्रयत्नसम्भूतत्वेन जीवाकर्तृकत्वेन वा पौरुषेयत्वविरहाद् वक्तृदोषास्पृष्टतया तथात्वादिति वाच्यम्, 'इति शुश्रुम' इत्यसकृत् श्रवणकर्तृत्वेनोत्तमपुरुषोपस्थापितोपनिषद्वक्तृजीवस्य 'धीराणां ये नस्तद् विचचक्षिरे' इति स्वोपदेष्टृजीवान्तराणां चात्रैव निर्देशेन पौरुषेयत्वसिद्धेः, इति चेन्न, ऋचः सामानि जज्ञिरे तस्माद् यजुस्तस्मादजायतेति मन्त्रवर्णेन वेदानां परब्रह्मसम्भूतत्व-

कथनादपौरुषेयत्वसिद्धेः, शुश्रुमेति विचचक्षिर इति च मन्त्रावयवतया तादृगानुपूर्वी-विशिष्टस्यैव मन्त्रस्य परब्रह्मण उत्पत्तेर्जीवविशेषस्य कर्तृत्वाप्रतीतेः जीवानां स्वाभिन्नतया श्रोतृव्याख्यातृरूपेण स्वस्यैव परब्रह्मणा निर्देष्टुं शक्यत्वाच्च । नन्वेवं जीवकृतकाव्यग्रन्थादेरप्यपौरुषेयत्वं स्यात्, जीवानां तत्त्वतः परब्रह्मस्वरूपत्वादिति मैवं काव्यादीनां भेदाभिमानि-जीव-प्रयत्नसापेक्षोत्पत्तिकत्वेन पौरुषेयत्वात्, वेदत्वेनोपनिषदां च तदभावादपौरुषेयत्वेन स्वतःप्रमाणतया सप्तशत्यादिस्मृतिलक्षणपौरुषेय-ग्रन्थवैलक्षण्येन तद् व्याख्यानं विशेषतो युक्तमिति दिक् ॥ १८ ॥

मृतं करोति जीवन्तमन्धमीक्षणसंयुतम् ।
यत्कृपा तामहं वन्दे दुर्गां सर्वेश्वरेश्वरीम् ॥
प्रस्थानयोः शक्तिभाष्यं कृत्वा तत्कृपया मया ।
कृतमेतन्मृत्युतल्पे श्रीपञ्चाननशर्म्मणा ॥
इतीशावास्योपनिषच्छक्तिभाष्यं समाप्तम् ।

शाक्तवादसारः ।

प्रणम्य परमेशानां श्रीपञ्चाननशर्म्मणा ।
गुर्वर्थोऽल्पाकृतिः शाक्त-वादसारो विरच्यते ॥

प्रत्यक्षमनुमानं शब्द उपमानमर्थापत्तिश्चेति पञ्च प्रमाणानि, पञ्चविधप्रमाकरणत्वात् । तत्र, इन्द्रियाणि प्रत्यक्षं प्रमाणम्, इत्येकः कल्पः, तथा हि—अक्षं प्रति = अक्षम् अक्षम्, प्रतीन्द्रियम् इति प्रत्यक्षशब्दार्थोऽव्ययीभावसमासात्, तेन विषयसन्निकर्षात्मकव्यापारवतामिन्द्रियाणां प्रत्यक्षात्मकप्रमाकरणत्वं सिद्धम् । इन्द्रियाणां करणत्वं नेन्द्रियत्वेन ; किन्तु चक्षुष्ट्वादिनेति बोधयितुं प्रतीत्यनेन वीप्सावचनम् । प्रति = प्रतिगतं विषयं प्रत्युपस्थितं विषयसन्निकृष्टमिति यावत्, अक्षम् इन्द्रियम्, इति तत्पुरुषसमासो वा, प्रतीत्यनेन व्यापारनिर्द्देशः ।

विषयाकारेन्द्रियवृत्त्येकीभूतबुद्धिवृत्तिः प्रत्यक्षं प्रमाणम्, इत्यपरः कल्पः । तथा हि—अक्षमक्षं प्रति वर्त्तते इति प्रतेर्वीप्साद्योतकत्वादव्ययीभावः, वृत्तिश्च लक्षणम्, इन्द्रियसमूहाधीना या बुद्धिवृत्तिरित्यर्थः, लक्षणं हि प्रतेरर्थः । कथं तावत् इन्द्रियाधीना बुद्धिवृत्तिरिति चेत्, उच्यते—विषयसन्निकर्षादिन्द्रियवृत्तिर्विषयाकारा भवति, वृत्त्याश्रितो विषयो मनोऽहङ्कारद्वारा बुद्धिमुपतिष्ठते, तेन बुद्धिवृत्तिस्तदाकारा भवति, तथाविधायां वृत्तौ यश्चित्प्रतिबिम्बसम्बन्धस्तेन व्यापारेण चित्प्रतिबिम्बसम्बन्ध-

विशिष्टा चिदुज्ज्वलितापराख्या सैव वृत्तिः प्रत्यक्षप्रमारूपा जन्यते, चित्प्रतिबिम्बसम्बन्धविशिष्टरूपं कार्य्यं तदविशिष्टरूपं च करणम्।

शास्त्रे क्वचित्, इन्द्रिये करणत्वोक्तिस्तु करणसम्पादकत्वादौपचारिकीत्यपरकल्पसमाधानम्।

व्याप्तिज्ञानरूपबुद्धिवृत्तिविशेषोऽनुमानम्। आप्तशब्दज्ञानरूपबुद्धिवृत्तिविशेषः, शब्दः सादृश्यज्ञानरूपबुद्धिवृत्तिविशेष उपमानम्, अनुपपद्यमानेनार्थेनोपपादककल्पनकरणरूपो बुद्धिवृत्तिविशेषोऽर्थापत्तिः सा हि व्यतिरेकव्याप्तिज्ञानरूपापि पृथगेव प्रमाणम्, अनुमितिं प्रत्यन्वयव्याप्तिज्ञानस्यैव लाघवेन हेतुत्वोपगमात्। अनुमिनोमीतिं कल्पयामीत्याद्याकारकज्ञानस्य मिथो भेदेनानुमित्यर्थापत्त्योर्भेदस्यावश्यकत्वाच्च। प्रत्यक्षप्रमाणरूपा या बुद्धिवृत्तिः सा चिदनुज्ज्वलिता, पराश्च बुद्धिवृत्तयश्चिदुज्ज्वलिता इत्यवधेयम्। प्रमा च प्रत्यक्षम् अनुमितिः शाब्दबोध उपमितिरर्थापत्तिश्चेति पञ्चविधा। प्रमाणान्त ंतार्थापत्तिः करणवाचिक्तिन्प्रत्ययान्ता, अत्र भावप्रत्ययान्तेति विशेषः। अत्र प्रत्यक्षम् अर्थसन्निकृष्टेन्द्रियवृत्त्येकीभावापन्नबुद्धिवृत्तिभिन्नबुद्धिवृत्त्यकरणकनिश्चयः, तेनेश्वरप्रत्यक्षसाधारणं लक्षणमिदं पर्य्यवसितम्, इन्द्रियकरणकत्वपक्षे वृत्तिकरणकत्वपक्षे च सुघटम्। निश्चयान्तरस्य तादृशबुद्धिवृत्तिभिन्नबुद्धिवृत्तिकरणकत्वान्नातिव्याप्तिः। तच्च द्विविधं बाह्यमान्तरं च, आन्तरमपि द्विविधं लौकिकं प्रातिभच्च। बाह्यं बहिरिन्द्रियसाध्यं घटादिप्रत्यक्षम्, आन्तरं ज्ञानादिप्रत्यक्षं जानामीत्याद्याकारकं यद् भवति, सुरभिचन्दनमित्यादि प्रत्यक्षं च। प्रातिभं युक्तेन मनसातीन्द्रियदर्शनम्। अलौकिकसन्निकर्षान्तरं नेष्यते।

व्याप्तिपक्षधर्म्मताज्ञानजन्यज्ञानमनुमितिः, शब्दज्ञानकरणकज्ञानं शाब्दबोधः, सादृश्यज्ञानकरणकज्ञानमुपमितिः, अनुपपद्यमानेनार्थेनोपपादककल्पनमर्थापत्तिः। प्रमाश्च सर्वाश्चित्प्रतिबिम्बसम्बन्धविशिष्टरूपाश्चिद्दुज्ज्वलिता बुद्धिवृत्तयः, चिदुज्ज्वलनं प्रतिबिम्बचिदवच्छिन्नत्वं प्रतिबिम्बचिद्भावापन्नत्वं वा। प्रत्यक्षानुमानयोरुक्तातिरिक्तप्रकारः शास्त्रान्तरप्रसिद्धः। शब्दे विशेषस्तूच्यते—

वृत्त्युपस्थितशब्दार्थविशिष्टप्रत्ययः शाब्दबोधः, पदस्य वृत्तिः शक्तिभक्त्यन्यतररूपा। शक्तिरभिधा, भक्तिर्लक्षणा। वाक्यस्य तु तात्पर्य्याख्या वृत्तिः। शब्दविशेषः पदम्, तच्च प्रातिपदिकधातुप्रत्ययान्यतमम्। तिङ्सुवन्तपदसमूहः केवलतिङन्तपदसमूहः केवलसुवन्तपदसमूहश्च वाक्यम्। पदपदार्थयोर्नित्यसम्बन्धः शक्तिः, स च ब्रह्मरूपः। सर्वेषामर्थानामनपायिब्रह्मरूपत्वात् सम्बन्धस्य तदभिन्नत्वाच्च। नन्वेवं घटपदवाच्यः पट इति प्रतीत्यापत्तिः, वाच्यत्वस्य शक्तिरूपत्वात् ब्रह्माभिन्नायाः शक्तेः सर्वसाधारण्यादिति मैवं पटादिविशेष्यकतादृशबोधे पटत्वादिना जात्या संस्थानविशेषरूपयाकृत्या वावच्छिन्नशक्तेरुपस्थित्या तथा व्यवहारासम्भवात्। घटपदवाच्यं ब्रह्मेत्यादिप्रतीतिस्त्विष्यत एव, सर्वं खल्विदं ब्रह्मेत्यादि श्रुतेः। न चैवं घटशब्दाद् ब्रह्मावबोधप्रसङ्ग इष्टापत्तौ च ब्रह्म शाब्दयामीति तेन ग्रहः प्रसज्येतेति वाच्यं परिच्छिन्नदर्शनरूपमोहेन तद्ग्रहबाधादात्मनो ब्रह्मानन्यत्वेऽपि तद्भासनबाधवत्। शाब्दबोधः खलु परोक्षापरोक्षभेदेन द्वेधा, वेदजन्यंशाब्दज्ञानमपरोक्षरूपतामापद्यमानं लौकिकं प्रत्यक्षमपि बाधते। तस्यापरोक्षत्वं प्रकृष्टनिदिध्यासनेन भवति। स्वतः प्रामाण्यं च तस्य। नैयायिकपद्धतिः

शाब्दबोधविचारे प्रोक्तातिरिक्तस्थलेऽविरुद्धानुसरणीया। एतद्विरुद्धा तु वर्जनीया। वेदाश्चत्वारः मन्त्रब्राह्मणात्मकाः, उपनिषदामत्रैवान्तर्भावः। ते चापौरुषेयाः, अनभिव्यक्तस्थिता एव ते सर्गादौ महाशक्त्योपदिष्टाः कल्याणाय जीवानाम्। सामान्यतः शब्दो द्विविधः नित्योऽनित्यश्च, तत्र वेदा नित्या वर्णाश्च नित्याः। लौकिकवाक्यानि त्वनित्यानि स्मृतिपुराणादीनां लौकिकवाक्यमध्ये निवेशः। ध्वनिश्चानित्यः। 'सर्व एव शब्दा अनित्याः' इति नैयायिकाः।

उपमाने विशेषस्तु—

उपमानं त्रिविधम्, अलौकिकविषयं लौकिकालौकिकविषयं लौकिकविषयं च। तत्राद्यम्, प्रकृतियागस्य विकृतावतिदेशः, द्वितीयम् आकाशवत् सर्वगतश्च नित्य इत्यादौ, तृतीयं च गोसदृशो गवय इत्यादौ। उपमितिश्च तात्पर्य्यग्रहरूपा शब्दशक्तिग्रहरूपा च। अतिदेशवाक्येन विकृतियागेतिकर्त्तव्यतादौ तात्पर्य्यग्रहः, आकाशवदित्युपमानेन च सर्वगतश्च नित्य इति वाक्यस्य पदयोर्वा तात्पर्य्यग्रहः। न ह्यत्र सर्वगतत्वमेकस्थानमपहायापरत्र गत्या सर्वदेशसञ्चारः, किंतु सर्वव्यापित्वम्, नित्यत्वं च नात्राग्निहोत्रादिवदनुष्ठाननैयत्यं किन्त्वनादिनिधनत्वम्, इत्येवं तात्पर्य्यग्रहो भवति। यद्यपि उपमानभूताकाशे वास्तवमनादिनिधनत्वं नास्ति तथापि लोकप्रतीतिसिद्धं ह्युपमानं भवतीति न दोषः। गवयादौ गवयादिपदवाच्यताग्रहश्च प्रसिद्धः।

अर्थापत्तौ प्रमाणे चार्थवादिकं विधिकल्पनमलौकिकी दिवाभोजनाभाववतो देवदत्तस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनकल्पनं च लौकिकी प्रमारूपार्थापत्तिः।

प्रमेयाणि चोच्यन्ते, तत्र शक्तिरेका नित्या चिदचिदुभयपर्य्याप्त-सत्तारूपा सा च चिदचिदुभयस्मान्नातिरिच्यते,—धर्म्मधर्म्मिणोरैक्यात्। इतरशक्तिव्यावर्त्तनाय सा महाशक्तिरित्यप्युच्यते। ननु सत्ता हि कालसम्बन्धरूपतया प्रसिद्धा किं तस्याः शक्तित्वमिष्यते? इष्यत इति चेद् घटादिसाधारण्यं शक्तेः प्रसज्यते न नित्यसंबद्धचिदचिदुभय-मात्रपर्य्याप्तत्वमिति मैवं मूलाचितो रजोंऽशविशेषस्य कालस्वरूपतया नित्यसंबद्धचिदचिदुभयपर्य्याप्तसत्तायां स्वरूपतस्तत्सम्बद्धत्वात्ततेः। स हि सत्तान्तराप्रतियोगिकः सम्बन्धो बलाख्योऽपि व्यपदिश्यते, स्वाभा-विकी ज्ञानबलक्रिया चेति श्रुतेः। सा हि महाशक्तिः, ब्रह्मेति परमात्मेति परमेश्वर इति परेतीश्वर इतीडिति चैवमादिभिरपरिच्छिन्नबोधकनामभि-रुमेति हैमवतीति कालीत्यद्रिजेति दुर्गेति सरस्वतीति चैवमादिभिः, किञ्च समष्टिबुद्धितत्त्वादिरूपसूक्ष्मदेहान्तर्भावेण विष्णुरिति नारायण इति रुद्र इति शिव इत्यादित्य इति चैवमादिभिः परिच्छिन्नस्त्रीपुंसदेहावच्छिन्न-तद्बोधकनामभिश्च व्यपदिश्यते। रूपतद्धेतुनामभेदे सत्यपि, ब्रह्मणो न भेद इत्येतद्बोधनाय सतीदुर्गाविष्णुरुद्रशिवप्रभृतितत्तन्नाम्नां शास्त्रेष्वन्तरान्तरा निर्विशेषब्रह्मपरत्वमपि 'सतीयमिति श्रुतिः, दुर्गायै दुर्गपारायै इति स्मृतिः, तद्विष्णोः परमं पदमिति रुद्रो महर्षिरिति शिवाय शिवतमाय' इत्यादयश्च श्रुतयः प्रतिपादयन्ति। विशेष-स्त्वेतावान्, उमादिदेहो मूलाचिदंशस्थबीजभूतरूपादिमान्, विष्ण्वादि-देहश्च बुद्धितत्त्वादिस्थाङ्कुरकल्परूपादिमान् इति। अतएव विष्णुः शरीरग्रहणमित्यादि सप्तशतीस्मृतिरुपपद्यते।

आत्मेति पुरुष इति च संज्ञाद्वयं नानार्थम्, तत्रात्मशब्दः क्वचित्

शक्तौ, क्वचिच्चिन्मात्रे क्वचिद् बुद्ध्यादौ श्रुतिषु प्रयुक्तः, प्रकरणादिवशादितरव्यावृत्तोऽर्थो ग्राह्यः। ब्रह्मेति संज्ञाया नानार्थत्वेऽपि, आकरग्रन्थे यस्य निरूपणं प्रतिज्ञातं तस्य प्रकृतत्वेन आत्मादिशब्दसामान्यं न तस्यास्ति। सा शक्तिर्ज्ञानबलक्रियालक्षणा ब्रह्मभावेन श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति, देवात्मशक्तिं स्वगुणैर्निगूढामिति च। नित्यसम्मिलितचिदचिदुभयात्मिका हि सा, चिदचितौ च सांख्यनये पुरुषप्रकृतितया शैवमते च शिवशक्तितयोच्येते, अर्द्धनारीश्वरमूर्त्तिरेतदभिव्यञ्जनी लीला। अत्र चित् चैतन्यमात्रम्, निर्गुणा नित्या चैका सा बिम्बभूता शिव इति महेश्वर इति चोच्यते। सा चाचित् सत्वरजस्तमोगुणात्मिका फलत एकापि शुद्धविद्या मायेति च द्विधा व्यपदिश्यते गुणपरिणामभेदात्। शुद्धविद्या मोक्षाय माया च संसाराय कल्पते। तिरोभूतरजस्तमोगुणा समुद्रिक्तसत्वा शुद्धविद्या, समुद्रिक्तरजस्तमोगुणा च माया, इयमविद्येति चोच्यते। तथा च परिणामिनित्यत्वं चिद्विलक्षणं शुद्धविद्यामाययोरेकत्वं ग्राहयति। चिदचिदुभयलक्षणशक्तिब्रह्मण एकत्वं च प्रागुक्तसत्ताविशेषवद्वृत्तिभेदाप्रतियोगित्वम्, नत्वेकत्वसंख्या; एकैकघटपटादौ व्यभिचरात्। यथा तुषशस्योभयरूपव्रीहियवादावेकांकुरजननी शक्तिः न तु सा केवलतुषे केवलतण्डुलादिशस्ये वा, तथा जगदुत्पादनशक्तिर्न केवलायां चित्यचिति वा किन्तु मिलितयोः, सैव शक्तिः सत्ताविशेष इत्यवोचाम। तस्याः शक्तेर्महान्, महत्तत्त्वमिति बुद्धितत्त्वमिति चाख्यायते। समष्टिव्यष्टिभेदेन तद्द्वैविध्यम्। व्यष्टिबुद्धिप्रतिबिम्बितचैतन्यं जीव उपाधिभेदादनन्तः। बिम्बप्रतिबिम्बभावाश्रितोऽयं चिद्वर्गः। महतोऽहङ्कारस्तत

एकादशेन्द्रियाणि, तानि भौतिकानीत्यपरे। अहङ्कारादेव पञ्च भूतानि शब्दादयः पञ्च विषयैः सह समुत्पद्यन्ते। पञ्च भूतानि तु अपञ्चीकृतानि, पञ्चीकृतानि च ; आद्यानि सूक्ष्माण्यपि एकैकगुणवृद्ध्या शब्दगुणकशब्द-स्पर्शगुणकादिरूपाणि भवन्ति। अतएव न सांख्योक्ततन्मात्ररूपाणि, तानि हि शब्दाद्येकैकगुणकानि सूक्ष्मशब्दाद्याश्रया भवन्ति, शब्दतन्मात्रं सूक्ष्मशब्दाश्रयः स्पर्शतन्मात्रं सूक्ष्मस्पर्शाश्रयो न तु शब्दाश्रय इत्यादि-रूपेण तन्मतसिद्धानि। न चैवं स्वमते पृथिवी च पृथिवीमात्रा चेत्यादिप्रश्नश्रुतिर्विरुध्यते, पृथिव्यादिशब्दस्यापञ्चीकृतपृथिव्यादिपरत्वेन मात्राशब्दस्य स्वल्पार्थकत्वात् पञ्चीकृतमहाभूतप्रविष्टपृथिव्यादिपरत्वेन च विरोधासम्भवात्। अथ तथाप्यष्टौ प्रकृतयः षोडश विकारा इति गर्भोपनिषद्वाक्यस्य का गतिरिति चेत्, तन्मात्रानभ्युपगन्तॄणामस्माकं नये पञ्च भूतानां प्रकृतिमध्ये शब्दादिविषयाणां च विकारमध्ये निवे-शेनोपनिषत्समन्वये बाधाभावात्। तस्मात् पञ्चतन्मात्ररहितः शब्दा-दिविषयपञ्चकयुक्तो महदादिरचिद्वर्गः। ध्वंसप्रागभावावतीतावस्थानाग-तावस्थे। अतीतावस्था द्विधा ससंस्कारा निःसंस्कारा च। पुनराविर्भाववती ससंस्कारा तदभाववती निःसंस्कारा। अवस्था न तद्वतो भिन्नेति न तयोः पृथगुपादानम्। अन्योन्याभावात्यन्ताभावौ भावाति-रिक्तस्वरूपशून्याविति न तयोश्च पृथगुपादानम्। शब्दादीनामुपादानत्व-विरहेऽपि इन्द्रियवद् बन्धनहेतुत्वात् पाञ्चभौतिकशरीरस्य 'शरीरं रथमेव तु' इत्यनेन निर्देशानन्तरम् 'इन्द्रियाणि हयानाहुर्विषयां-स्तेषु गोचरान्' इति काठकश्रुत्या पृथगुपादानाच्च पृथगुल्लेखः, काम-प्रयत्नादयो बुद्धेरेव वृत्तय इति वृत्तिमदनतिरेकान्न पृथगुपात्ताः यथा-

सम्भवं प्रमाणान्येषु प्रमेयेषु संकीर्णमसङ्कीर्णं वा व्यवतिष्ठन्ते। महत्तत्त्वोपाधिकतया शक्तेरेव हिरण्यगर्भ उत्पद्यते इति श्रुतिस्मृतिनिर्घोषः उपाधिप्राधान्यादयमेव समष्टिमहत्तत्त्वरूपोऽप्युच्यते तत्क्रमेण च जगदुत्पत्तिः।

अथ चेतनाया महाशक्तेर्हिरण्यगर्भक्रमेण सुखदुःखभेददयुतानुच्चावचान् प्राणिनः सृजन्त्या वैषम्यनैर्घृण्यापत्तिरनीश्वरत्वापत्तिर्वा, न च अनादिरियं सृष्टिर्महाशक्तिश्च पर्जन्यवत् कारणम्। बीजभेदाच्छस्यभेदवत् प्राक्तनपुण्यापुण्यकर्म्मभेदादेव सुखदुःखभेदो जीवभेदश्चेति वाच्यम्, प्राचां तत्सिद्धान्तस्य निर्दोषत्वेऽपि साम्प्रतिकैर्विजातीयैस्तस्याशक्तवचनत्वोत्कीर्त्तनात् तुष्यत्विति न्यायेन तत्परिहारस्यापि कर्त्तव्यत्वात्। इतिचेन्न एकैकहिरण्यगर्भोपक्रान्तसृष्टेः सादिसान्तत्वेपगमेऽपि वैषम्यादिदोषाभावात्। तथा हि—श्रूयमाणदुग्धस्य वन्धुराणि स्फोटनानीव व्यष्टिजीवोपाधयः परब्रह्माख्यमहाशक्त्यचिदंशस्य सर्गादावुच्चावचाः परिणामाः, तस्य च त्रिगुणत्वेनावर्त्तनविशेषेण सामान्यतः केचित् सत्वप्रधानाः, केचिद्रजःप्रधानाः, केचित्तमःप्रधानाः; विशेषतश्च गुणानां न्यूनाधिकभावेनानन्तप्रकारा भवन्ति। तेष्वेव स्वापरांशचित्प्रतिबिम्बपातो वस्तुनिसर्गादेव, सूर्य्यमण्डलस्य मेघाद्यव्यवहितस्य निर्म्मलाविलेषु गोष्पदपल्वलकासारसरिदादिष्विव भवति, भवति च तेषां प्रतिबिम्बानां नानारूपता, न हि तत्रास्ति चिकीर्षाकृत्याद्यपेक्षा। यथा नित्यापरिणामिचिदंशस्य परिणामित्वानित्यत्वसंघटनाभावेऽपि महाशक्तेर्न भवत्यैश्वर्य्यव्याघातस्तथा स्वस्यैवाचिदंशस्य स्वरूपसंहरणाभावऽपि। सत्येवं कुतो वैषम्यनैर्घृण्याशङ्का? प्रत्युत दुरुपाधि-

पीडितजीवानां दुःखमोचनाय श्रुतिमुखेनोपाधिदोषापसारणोपायानुपदिशन्त्यास्तस्याः समदर्शिताकारुण्ये एव विज्ञायेते। उपदेशश्चासौ सर्वसामान्येन, उपाधेर्दोषभूयस्त्वे तदानीं तदुपदेशमगृह्णतामपि, कालान्तरे भवत्येव निस्तारः, एवमेकहिरण्यगर्भसृष्टौ यावन्तो जीवाः समुद्भूतास्तेषां सर्वेषामेव मोक्षस्तद्धिरण्यगर्भे लयदशायां भवति, नच मुक्तानामस्ति पुनरुद्भवः, निःसंस्कारातीतावस्थत्वात् तदीयबुद्धितत्त्वस्य। हिरण्यगर्भान्तरसर्गेऽपीयमेव व्यवस्था। हिरण्यगर्भधारासृष्टिस्त्वनिर्णीतादिकत्वरूपमनादित्वं नातिशेते। श्रुतिस्मृतिसमुद्घोषितः सृष्टेरनादित्ववादस्तावदेवमेवोपपादनीयः। एकहिरण्यगर्भस्य प्रतिकल्पं सृष्टिस्तु ससंस्कारातीतावस्थजीवोपाधिबुद्धिस्थितधर्म्माधर्म्मसापेक्षा।

अत्रेदमवधेयम्,—महदादिकविषयपञ्चकपर्य्यन्ता त्रयोविंशतिपदार्थी महाभारतशान्तिपर्वीयवशिष्ठवर्णितसांख्यसम्मता। प्राणश्च बुद्धितत्त्वम्, प्राणोऽस्मि प्रज्ञात्मेति श्रुतेः, प्राणादिपञ्चवृत्तयः प्रयत्नरूपाः, तत्प्रवर्त्तिताः शारीरवायवश्च प्राणशब्देन गृह्यन्ते इन्द्रियाणि च तथा। एषु प्राणशब्दस्य मुख्योऽर्थो बुद्धितत्त्वम्, अन्ये गौणाः। तथापि न पदार्थान्तरं वृत्तीनां वृत्तिमदनतिरेकात्; शारीरवायूनां च भूतान्तर्गतत्वात्, एकादशेन्द्रियाणां ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकमनसां पृथक्परिगणनाच्च। महदादिविषयान्तेष्वनित्या परिणामिनी सत्ता। परिणामित्वं परिवर्त्तनशीलत्वम् अपरिणामिनी नित्या सत्ता चिन्मात्रे, नित्या परिणामिनो सत्ता च मूलभूतायामचिति, प्रत्येकमेतयोः कार्य्यजननी सत्ता नास्ति, सा हि चिदचिदुभयपर्य्याप्ता। तादृशसत्ता पर्य्याप्त्यधिकरणं

ब्रह्म, तस्य देवात्मशक्तिरित्यपि श्रौती प्रसिद्धिः, देवात्मशक्तिं स्वगुणै-र्निगूढामिति श्रुतेः। नासौ चिन्मात्रशक्तिः स्वगुणैरित्यस्यानुपपत्तेः। चिन्मात्रस्य निर्गुणत्वात्। उभयरूपत्वे त्ववच्छेदकभेदेन सगुणत्व-निर्गुणत्वोपपत्तेः, अतएव 'गुणी सर्वविद्यः' इति 'साक्षी चेता केवलो निर्गुणश्चे'ति श्रुत्योरविरोधः, कृपाकृत्यादीनां ज्ञातृत्वस्य च नानुपपत्तिः। चिन्मात्रस्य ब्रह्मत्वे तदनुपपत्तेः न चेष्टापत्तिः, 'एष ह्येव साधुकर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत' इत्यादि श्रुतिविरोधात्। न च मायोपाधिकस्य तथात्वं निरुपाधिकस्य निर्गुणत्वमिति वक्तव्यम्, द्वैतापत्तिवारणाय मायाया अनिर्व्वाच्यत्वकल्पनादेः श्रुतिमूलकत्वाभावेना-प्रामाणिकत्वात्,'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुत्यौपाधिकत्वप्रतिषेधाच्च। न खल्वौपाधिकी शक्तिः स्वाभाविकी भवति। अन्यासां शक्तीनां विविधत्वकथनात् स्वाभाविकशक्तेरेकत्व-ज्ञापनात् तस्या ज्ञानबलक्रियात्मकत्वाच्च चिदचिदुभयशक्तौ पर्य्यवसानात्। अत्र च 'नो सदासीन्नासदासीदि'ति बह्वृच नासदीयसूक्तमन्त्रवर्णो 'न सत्तन्ना सदुच्यते' इति गीतास्मृतिश्चानुग्राहकौ भवतः। परमार्थसत्याश्चितो नो सदासीदिति न सदुच्यते चेति न स्वरूपमाहतुः, चिदचिद्ब्रह्मवादेऽ-वच्छेदकभेदेन, अपरिणामिसत्त्वतदभावाभ्यां तयोः समन्वयः।

भवति चैतस्मिन् पक्षे अचिदवच्छेदेन परिणामितयोपादानत्वेन प्रकृतित्वं चित्प्रयुक्तज्ञानेन च कर्त्तृत्वमिति कारणताद्वयं तदुभयरूपे ब्रह्मणि सिध्यत् यतो 'वा इमानि भूतानि जायन्ते' इति श्रुतौ यत इत्यस्य जनिकर्त्तुः प्रकृतिरित्यपादानत्वमुपपादयति 'कर्त्तारमीशम्' इत्यादि श्रुत्युक्तं कर्त्तृत्वं च। विवर्त्ताधिष्ठानत्वेऽपादानानुपपत्तिः, न हि

भवति रज्जोः सर्प उत्पद्यत इति। न च शक्तेराश्रितत्वाद् ब्रह्मणश्चाश्रयत्वात्, शक्तेर्ब्रह्मत्वमनुपपन्नमिति शङ्क्यम्, तथाकल्पनस्य श्रुतिविरोधेनायुक्तत्वात्, तथा हि श्वेताश्वतरे ब्रह्मवादिन उपक्रम्याम्नातो मन्त्रः, ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति अत्र यदि देवात्मानन्या शक्तिर्न स्यात् तद्दर्शनं प्रथमं नाभविष्यत् शक्तिमद्दर्शनं विना शक्तिदर्शनासम्भवात्, देवात्मा दीव्यन् क्रीडन्नात्मा दीव्यन्नित्यनेनाचित आत्मेत्यनेन चितश्च लाभाच्चिदचिदुभयं तद्रूपा शक्तिर्देवात्मशक्तिर्ब्रह्मेति प्राप्तौ तस्याश्रयत्वं युक्तम्, न त्वाश्रितत्त्वम्। न च देवात्मनः शक्तिरिति समासः, देवात्मदर्शनं विना तच्छक्तिदर्शनासम्भवस्योक्तत्वात् तत्पुरुषकर्मधारयसन्देहे निषादस्थपतिन्यायेन तत्पुरुषस्य हेयत्वाच्च। न च य इति पुंलिङ्गानुपपत्तिः, शक्त्यभिन्नस्य देवात्मन एव य इत्यनेन परामर्शात् विभिन्नलिङ्गानां भार्य्याकलत्रदारादिशब्दानामेकार्थवाचकतायामविरोधात्। तस्य शक्तित्वस्थापनाय शक्तिपदप्रवेशात्। तादृशशक्तेर्ब्रह्मरूपाया उपासनादुपासकानामधिकारभेदादैहिकधनधान्यादिसमृद्धिस्वर्गब्रह्मलोकमोक्षास्तदीयकृपया भवन्ति, अधिकारभेदेनोपासनभेदात्, कृपाभेदसिद्धेः। उपासकस्योपासनरूपा या बुद्धिः तस्या एव कृपारूपतया पर्य्यवसानात्, मानवस्येव न चाटुवल्लभत्वादिदोषः शक्तिब्रह्मणः प्रसज्यते, तथा हि वस्त्रोपरिजलसेके यथा तदुपादानभूततूलकस्यार्द्रत्वमेवमुपासकबुद्धौ श्रद्धाविश्वासादिरूपसात्त्विकवृत्तेरुदयात् तदनुकूलप्रयत्नाद्युदयाच्च तद्बुद्ध्युपादानमूलप्रकृतेस्तदवच्छेदेन प्रयत्नलक्षणस्य सत्वानुकूलरजसः सत्वस्य

च यः प्रकर्षः स एव तस्य कृपारूपेण पर्य्यवस्यति, एवं हि कृपाया-स्तद्गुणपरिणामरूपत्वम्। श्रद्धाभक्तिप्रयत्नादिभेदाच्च कृपातारतम्यम्, वस्त्रे जलसेकतारतम्येन तदुपादानस्यार्द्रतातारतम्यवदित्यवधेयम्।

अस्य शास्त्रस्य परमप्रयोजनं मोक्षः तदभिव्यक्तिप्रकारश्चिन्त्यते, ज्ञानयोगिनां चिदचिदात्मकब्राह्मसाक्षात्कारेण बिम्बादनन्यत्वं प्रति-बिम्बस्य, कार्य्यभूततदुपाधेर्महत्तत्त्वस्य तद्घटितलिङ्गशरीरस्य वा कारणभूतप्रकृत्यनन्यत्वं च दृश्यते इति जीवस्य परिच्छिन्नत्वमोहनिवृत्तिः सर्वाभेदसाक्षात्कारात्। तन्मोहनिवृत्तौ च रागद्वेषादिनिवृत्तिद्वारेण जन्मोच्छेदात् परमानन्दतया पर्य्यवसानमिति सर्वदुःखनिवृत्तिरूप-तैर्थिकान्तरसाधारणमोक्षसिद्धिः।

गौणप्रयोजने स्वर्गाभ्युदयौ। तत्र स्वर्गः सुखविशेषः सामान्यत-स्तद्भोगस्थानं पितृलोकः, स च चन्द्रलोकान्तः सकामकर्म्मविशेषाणां भवति परेषां च तादृशकर्म्मणां वरुणादिलोकादिरिति विशेषः, श्रुति-स्मृतिपुराणेभ्यो वेदितव्यः निष्कामकर्म्मिणां ब्रह्मलोको मोक्षचरम-फलः। लेशतः सकामानां निष्कामकर्म्मिणां तु पुनरावृत्तिसहितो ब्रह्मलोकभोग इति केचित्। वस्तुतस्तेषां निष्कामत्वं नास्ति। किञ्च पुनरावृत्तिसहितो ब्रह्मलोकभोगः क्षयिसुखविशेषसाक्षात्काररूपत्वात् स्वर्गभोग एवेति अभ्युदयश्चैहिकः प्रसिद्धः।

ततोऽन्येषां विशेषश्च ;—पापकर्म्मणां बुद्धेः पापा वृत्तिरुपादाने निजिघृक्षात्मिका भवति पापवृत्तेस्तामसत्वात् तदनुकूलरजसस्तदनु-षङ्गित्वाच्च। ते चाधोगता भवन्ति येषां न देवयानो न वा पितृयानः पन्थाः, के ते ? पारमेश्वरोपासनविमुखा ये भवन्ति। निरय एष तेषां गतिः

নিরয়োত্তীর্ণানাং দংশমশকাদিজন্ম বৃক্ষাদিজন্ম চ তানীমানি ক্ষুদ্রাণ্যরাকৃদাবর্ত্তীনি ভূতানি ভবন্তীতি স্থাণু মন্যেঽনুসংযন্তীতি চ শ্রুতেঃ।

উত্তমানাং কর্ম্মযোগিনাং চ শক্তিব্রহ্মকৃপয়া চিন্মাত্রাপরোক্ষ্যপূর্ব্বকং চিদচিদুভয়াত্মকব্রহ্মাপরোক্ষ্যং, তদাপরাক্ষ্যে বীতরাগত্বে মোক্ষঃ, বাধাবিশেষেণ তদভাবেঽপি ব্রহ্মলোকঃ ইতি বিশেষঃ।

ইতি শক্তিভাষ্যপ্রবেশার্থঃ শাক্তমতসংক্ষেপঃ।

আবির্ভূয় স্বয়ং স্বপ্নে যা মাং শাস্ত্রার্থমন্বশাৎ।
সা কালী প্রীয়তামেতন্মূকালাপনলীলয়া ॥

শাক্তবাদ-সার-

ভাবানুবাদ

প্রমাণ পাঁচ প্রকার,—প্রত্যক্ষ, অনুমান, শব্দ, উপমান এবং অর্থাপত্তি। প্রমা=যথার্থ জ্ঞান—নির্ভুল জ্ঞান। সেই প্রমা পাঁচ প্রকার বলিয়াই, যে যে কারণ নিজ নিজ কার্য্য দ্বারা সেই পাঁচ প্রকার প্রমা উৎপন্ন করে তাহারা প্রমাণ, এবং তাহারাও পাঁচ প্রকার।

প্রত্যক্ষ প্রমা, অনুমিতি প্রমা, শাব্দ প্রমা, উপমিতি প্রমা ও অর্থাপত্তি প্রমা যে পরস্পর বিভিন্ন তাহা তৎসমুদয়ের স্বরূপ পরিচয়েই বুঝা যায়। যথা—ইন্দ্রিয়ের সহিত বিষয়ের সম্বন্ধ হইতে যে প্রমার উৎপত্তি তাহা প্রত্যক্ষ—বিশেষ দৃষ্টান্তস্বরূপে চাক্ষুষ প্রত্যক্ষ প্রমাকে প্রথম ধরিতেছি—চক্ষুর সহিত বাহিরের কোন বস্তুর সম্বন্ধ হইল, যথা—কোন বন্ধু দূর হইতে দৃষ্টিপথে পতিত হইলেন, চক্ষুর কার্য্য দূরত্ব হেতু সম্পূর্ণরূপে

না হওয়ায় তখন ঠিকভাবে চাক্ষুষ প্রত্যক্ষ হয় না। কিন্তু একটু নিকটস্থ হইলে চক্ষুর কার্য্য সম্পূর্ণভাবে হওয়ায় ঠিকভাবেই চাক্ষুষ প্রত্যক্ষ হয়। এই যে প্রত্যক্ষ ইহার সহিত অনুমিতি প্রভৃতির ভেদ সকলেই বুঝেন, অতএব প্রত্যক্ষ প্রমাকে পৃথক্ ভাবেই ধরিতে হয়।

অনুমিতিও শাব্দ বোধ প্রভৃতি হইতে পৃথক্, শব্দ শ্রবণ ব্যতীতও অনুমিতি হইয়া থাকে; কার্য্য প্রভৃতি (ব্যাপ্য) দেখিয়া যে কারণ-প্রভৃতির (ব্যাপকের) জ্ঞান তাহা অনুমিতি; উদাহরণ—প্রবাসী বন্ধু বাটী আসিতেছেন, তাঁহার নিত্য সহচর পুরাতন ভৃত্য তাঁহার পেটিকাদি লইয়া হৃষ্টচিত্তে অগ্রবর্ত্তী, তাহাকে দেখিয়াই যে বন্ধুর আগমন-নিশ্চয় তাহা অনুমিতি, বন্ধুর সহিত তখন চাক্ষুষ না হইলেও তিনি আসিয়াছেন এমন কথা কাহারও মুখে না শুনিলেও তদ্বিষয়ে যে নিশ্চয় হয় তাহাকে অন্যবিধ প্রমা বলিতেই হয়। সেই প্রমার নাম অনুমিতি।

প্রতারণাদি শঙ্কার অবিষয়ীভূত শব্দ হইতে বৃত্তি দ্বারা উপস্থিত-অর্থ-সম্বন্ধযুক্ত যে বিশিষ্ট জ্ঞান তাহা শাব্দ বোধ। শাব্দ বোধে পদের বৃত্তি অভিধা নাম্নী শক্তি এবং লক্ষণা, বাক্যের বৃত্তি তাৎপর্য্য। অর্থবিশিষ্ট শব্দই পদ এবং পদসমূহ বাক্য।

অভিধা শক্তি—পদ ও অর্থের নিত্য সম্বন্ধ, তিনি ব্রহ্মস্বরূপ। যে হেতু "সর্ব্বং খল্বিদং ব্রহ্ম" এই শ্রুতি অনুসারে সকল পদার্থই ব্রহ্ম। এখন ইহাতে আপত্তি হইতে পারে—তাহা হইলে 'পট, ঘট পদ বাচ্য' 'পট ঘট পদের অভিধেয়'—এইরূপ প্রত্যয় হউক। ইহার উত্তর এই যে, ঐরূপ প্রত্যয়ে পটত্বাবচ্ছিন্ন অর্থাৎ পটত্ব দ্বারা সীমাবদ্ধ ব্রহ্মই ভাসমান হন, —সেইরূপ সীমাবদ্ধ ব্রহ্ম পট ব্যতীত ঘট নহেন, সুতরাং 'পট ঘট-পদবাচ্য' এই প্রত্যয় হইতে পারে না। ব্রহ্ম ঘট-পদবাচ্য এমন প্রত্যয় অস্বীকার করা যায় না, তবে সকলের ঐরূপ প্রত্যয় হয় না, কারণ সংসারী জীব পরি-

চ্ছিন্নত্ব মোহগ্রস্ত, যেমন কামলা রোগগ্রস্ত ব্যক্তি, শুভ্র বস্ত্রকে হরিদ্রা বর্ণ দেখে, সেইরূপ মোহগ্রস্তের ঐরূপ শব্দে পরিচ্ছিন্ন (সীমাবদ্ধ) দর্শনই হয়। যদি বল, তবে, শুক্ল ঘট ইত্যাদি শাস্ত্রীয় শব্দ হইতে যে বিশিষ্ট জ্ঞান সংসারী জীবের হয়, তাহা 'প্রমা' হইল কিরূপে? তাহার উত্তর এই যে, যে বস্তু যাহা, ঠিক সেইভাবে তাহাকে জানাই তো প্রমা—ঘট—যখন বাস্তব পক্ষে ব্রহ্ম হইতে অতিরিক্ত নহে, তখন তাহাকে ঘটত্বরূপে জানা অসম্পূর্ণ জ্ঞান হইলেও ভুল জ্ঞান নহে। অতএব সংসারীর পক্ষে অসম্পূর্ণ জ্ঞানও প্রমা; তবে যে ঘটপদ হইতে ব্রহ্মরূপে ব্রহ্মজ্ঞান না হওয়া, ইহাই ভুল। শাস্ত্রবাক্য সেইরূপ ভুল হওয়ার পক্ষে বাধা দান করিয়াছেন। যতদিন সে বাধা-বলে ভুল ভাঙ্গিয়া বাস্তব জ্ঞান উপস্থিত না হয়, ততদিন তাহার পক্ষে এইরূপ অসম্পূর্ণ জ্ঞানই প্রমা। এ অবস্থায় ঝিনুককে যদি কেহ রূপা বলিয়া পরিচয় দেয় তাহার কথায় যে বোধ জন্মে তাহা প্রমা নহে ভুল; কারণ, উহা প্রতারণাশঙ্কার অবিষয়ীভূত বাক্য নহে। অতএব তজ্জনিত শাব্দ বোধ, প্রমা শাব্দ বোধের অন্তর্গত হইতে পারে না।

উপমিতি—সাদৃশ্য জ্ঞান হইতে যে প্রমার উৎপত্তি তাহা উপমিতি, বাক্যের তাৎপর্য্য জ্ঞান এবং নামার্থজ্ঞান কতিপয় স্থলে উপমিতি হইয়া থাকে—যথা "অমুক যাগ (দর্শপূর্ণমাস) সদৃশ অন্য যাগ হইবে" এইরূপ বিধিবাক্যকে অতিদেশ বাক্য বলে, কিন্তু অতিদেশ বাক্যের তাৎপর্য্য কি—তাহা বুঝিয়া লওয়া ঐ সাদৃশ্য জ্ঞান হইতে হয়; ইহা অলৌকিক উপমিতি, 'ব্রহ্ম আকাশ সদৃশ সর্ব্বগত ও নিত্য' এই অর্থের যে উপনিষদ্ বাক্য, তাহা হইতে যে আকাশ সাদৃশ্য জ্ঞান হয়, তদ্দ্বারা 'সর্ব্বগত ও নিত্য' এই পদদ্বয়াত্মক বাক্যের বা দুইটি পদের তাৎপর্য্য জ্ঞান হইয়া থাকে। তাৎপর্য্য এই—তিনি সর্ব্বগত হইলেও সঞ্চারযুক্ত নহেন, নিত্য—যাহা না করিলে পাপ হয়, এরূপ কর্ম্মের ন্যায় নিত্য নহেন, কিন্তু জন্ম-বিনাশরহিত

এই প্রকার নিত্য। সাধারণ লোকে আকাশকে ঐরূপ নিত্যই মনে করে, সাধারণ ব্যবহার মতেই ঐ উপমান। তাহা হইতে সর্ব্বগত ও নিত্য শব্দের তাৎপর্য্য জ্ঞান হয়—ইহা লৌকিকালৌকিক উপমান, কারণ, উপমানাংশ লোকপ্রসিদ্ধ এবং উপমেয়াংশ লোকের অজ্ঞাত। গ্রাম-বাসী বনগমন করিয়া প্রথম গবয় দর্শনে 'গবয়' (নীল গাই) গো-সদৃশ এই পূর্ব্বশ্রুত বৃদ্ধ বাক্য স্মরণে প্রথম-দৃষ্ট গবয়ের যে গবয় নামে পরিচয় জ্ঞান তাহা সাদৃশ্যজ্ঞানের ফল ইহা লৌকিক উপমিতি।

অর্থাপত্তি—যাহা না হইলে, দৃশ্যমান কার্য্য ঘটে না বা শ্রুতিবাক্য অসঙ্গত হয় তাহা বুঝিয়া সেই বস্তুর যে কল্পনা তাহা অর্থাপত্তি ; যথা রামদত্ত বেশ মোটা, কিন্তু দিবসে কিছুই ভোজন করেন না। রাত্রিতে যে তিনি ভোজন করেন ইহা চাক্ষুষ না হইলেও তাহার প্রমাণ তাঁহার স্থূলত্ব। অহোরাত্র ভোজন না করিয়া থাকিলে, কয়দিনেই কৃশ হইতেন, ইনি কিন্তু মোটা আছেন, অতএব রাত্রিতে ভোজন ইনি যে করেন তাহা কল্পনা করিতেই হয়। এই যে কল্পনা বা নিশ্চয় তাহা প্রমা তাহারই নাম অর্থাপত্তি। ইহা অনুমিতি নহে, কারণ মোটা থাকাতে রাত্রিভোজনের নিয়ত সম্বন্ধ (ব্যাপ্তি) নাই কেবল দিবাভোজীও মোটা হইয়া থাকে। বিশেষতঃ এখানে 'রাত্রিভোজন' অনুমেয় রূপে উপস্থিত হয় নাই। অনুমিতি স্থলে অনুমেয়ের (সাধ্যের) এবং হেতুর উপস্থিতি আবশ্যক। যেমন 'বহ্নিমান্ ধূমাৎ' বহ্নি অনুমেয়, ইহার উপস্থিতি অর্থাৎ ব্যাপ্তিজ্ঞানের সহিত তদ্বিষয়ে জ্ঞান আছে, তবে তাহা কোথায় ? ইহাতেই হেতুদর্শন দ্বারা পর্ব্বতে আছে বলিয়া নিশ্চয় করিতে হয়, কিন্তু অর্থাপত্তি স্থলে এরূপ নহে। 'রাত্রিভোজন' কোনরূপে উপস্থিত না হইলেও তদ্ব্যতীত মোটা হওয়া অসম্ভব এই জ্ঞান হইতেই রাত্রিভোজনের কল্পনা হইতে পারে, এইরূপ পার্থক্য হেতু ঐ দুইটি পৃথক্ প্রমা। (শ্রুতির উদাহরণ বিস্তার-ভয়ে প্রদত্ত

হইল না)। প্রত্যক্ষ হইতে আরম্ভ করিয়া প্রত্যেক প্রমা যে পৃথক্ তাহা প্রদর্শিত হইল।

শাক্তমতে প্রমেয়—(১) মহাশক্তি (ব্রহ্ম) (২) চিন্মাত্র—শিব ইনি নিরুপাধিক চৈতন্য বা পুরুষ (৩।৪) অচিন্মাত্র—প্রকৃতি, ইনি শুদ্ধবিদ্যা ও মায়া এই দুইভাবে যথাক্রমে মোক্ষ ও সংসারের কারণ, মহাশক্তি হইতে (৫) বুদ্ধিতত্ত্ব, ইনি সমষ্টিরূপে হিরণ্যগর্ভ নামে অভিহিত, সমষ্টিবুদ্ধিতে ইনি চিৎ প্রতিবিম্ব দ্বারা চেতন। (৬) ব্যষ্টি বুদ্ধিতত্ত্বে প্রতিবিম্বিত অসংখ্য জীব ইহা হইতে উৎপন্ন। বুদ্ধিতত্ত্ব হইতে (৭) অহঙ্কার, অহঙ্কার হইতে (৮) মন (৯) চক্ষুঃ (১০) শ্রবণেন্দ্রিয়—কর্ণ (১১) ঘ্রাণেন্দ্রিয়—নাসিকা (১২) রসনা (১৩) ত্বক্ (১৪) বাক্ (১৫) হস্ত (১৬) পাদ (১৭) পায়ু এবং (১৮) উপস্থ এই একাদশ ইন্দ্রিয়ের আর (১৯) শব্দ (২০) স্পর্শ (২১) রূপ (২২) রস (২৩) গন্ধ সহ (২৪—২৮) পঞ্চভূতের উৎপত্তি। (শব্দ-স্পর্শাদির প্রবেশ শ্রুতিসম্মত ও শান্তিপর্ব্বে বশিষ্ঠোক্ত সাংখ্যসম্মত *)। এইরূপে বিশ্বব্রহ্মাণ্ড সৃষ্টি। মহাশক্তিই চিৎ ও অচিৎ অর্থাৎ নিত্যসম্মিলিত, পুরুষ ও প্রকৃতিস্বরূপ ব্রহ্ম। (শ্বেতাশ্বতর উপনিষৎ ও সপ্তশতী প্রভৃতিতে প্রমাণ আছে)। নিত্য সম্বন্ধযুক্ত অর্দ্ধনারীশ্বর মূর্ত্তি হইতে প্রকৃতি-পুরুষের এই সম্বন্ধ বা সম্মিলন শিক্ষণীয়। ইনি ভক্তের প্রতি কৃপা করিয়া সাকারও হন। প্রকৃতিস্থিত অনভিব্যক্ত রূপাদিই এই আকারে স্পষ্টীকৃত,—ইনি দুর্গা কালী ইত্যাদি নামে প্রসিদ্ধ। বুদ্ধিতত্ত্বস্থিত বীজভূত রূপাদি গ্রহণ করিয়া আবির্ভূত সাকার ব্রহ্মই নারায়ণ। অহঙ্কারস্থিত তদ্দ্যোমোন্মুখ অঙ্কুরতুল্য রূপাদি গ্রহণ করিয়া আবির্ভূত সাকার ব্রহ্মই রুদ্র ইত্যাদি। যেমন বিভিন্ন প্রকার বেশ পরিধান করিলেও পরিধানকারী মানবের ভেদ হয় না, সেইরূপ আকার পার্থক্যে মহাশক্তি ব্রহ্মের ভেদ হয় না। প্রকৃতি পুরুষ দুই হইলেও উভয়স্থিত কার্য্যজননী সত্তা এক—যেমন তুষ ও তণ্ডুল উভয় মিশ্রণে ধান্য, কেবল তুষে বা কেবল তণ্ডুলে

* বিশেষ বিচার ব্রহ্মসূত্র শক্তিভাষ্যে দ্রষ্টব্য।

অঙ্কুরোৎপাদিকা শক্তি নাই, তদুভয়ের মিলিত রূপ ধান্যে তাহা আছে ; সেইরূপ এক সত্তা লইয়াই ব্রহ্ম 'একমেবাদ্বিতীয়ম্'। এইজন্য শাক্তবাদের নামান্তর সরূপাদ্বৈতবাদ। কেবল চিন্মাত্রে ইচ্ছা-যত্ন প্রভৃতি থাকিতে পারে না সর্ব্বজ্ঞও তিনি হইতে পারেন না। নির্গুণ চিন্মাত্রে ঐ সকল গুণ থাকিবে কিরূপে? যদি বল মায়া আশ্রয়েই তিনি গুণযুক্ত, কিন্তু তাহা হইলে 'স্বাভাবিকী জ্ঞানবলক্রিয়া' এই শ্রুতির সহিত বিরোধ হয়। জ্ঞানবল ও ক্রিয়াশক্তি যদি স্বাভাবিক হইল তখন তাহাকে মায়িক বা ঔপাধিক বলা যায় না। মায়াবাদে জগৎকে বিবর্ত্তস্বরূপ বলিতে হয় ; শ্রুতিতে আছে 'যতো বা ইমানি ভূতানি জায়ন্তে'—যাঁহা হইতে এই সকল প্রাণীর উৎপত্তি,—পাণিনি সূত্রানুসারে, 'যতঃ' এই যে অপাদানে পঞ্চমী বিভক্তি, তাহা বিবর্ত্তস্থলে হয় না, প্রকৃতি-বিকৃতি স্থলেই হয়। সূত্র 'জনিকর্ত্তুঃ প্রকৃতিঃ' (.পা১।৪।৩০)। যদি বিবর্ত্তস্থলেও পঞ্চমী হইত, তাহা হইলে 'রজ্জোঃ সর্প উৎপদ্যতে' (রজ্জু হইতে সর্প উৎপন্ন হয়) ইত্যাদি রূপ প্রয়োগ থাকিত, কিন্তু তাহা নাই। অতএব মায়াবাদ বা বিবর্ত্তবাদ শ্রুতিসম্মত নহে। ভগবান শঙ্করাচার্য্য যে মায়াবাদ আশ্রয় করিয়া উপদেশ দিয়াছেন, তাহা বিশেষ অধিকারীর ধ্যানপথ পরিষ্কৃত করিবার জন্য, শাক্তবাদই যে তাঁহার অভিমত তাহা তদীয় প্রধান মঠসমূহে আচার দ্বারা প্রমাণিত। শ্রীচন্দ্রমৌলীশ্বর এবং শ্রীচক্র সর্ব্বত্রই পুরুষ ও প্রকৃতির প্রতীকরূপে অর্চ্চিত। এই উপাসনা সন্ন্যাসী ও গৃহস্থ সকলেরই জন্য। মহাশক্তির অচিদংশে প্রথম পরিণামই বুদ্ধিতত্ত্ব, ইচ্ছা ও যত্ন প্রভৃতি বুদ্ধির বা অন্তঃকরণের বৃত্তি, তৎপরে ক্রমিক পরিণামে বিশ্বব্রহ্মাণ্ড। অতএব তিনি প্রকৃতি—অপাদান,—আর চিদংশে জ্ঞানস্বরূপ বলিয়া মিলিত উভয়কে সর্ব্বজ্ঞ বলা হয়। সর্ব্ববিষয়ক জ্ঞানযুক্তই 'সর্ব্বজ্ঞ' শব্দ হইতে বুঝা যায়। জ্ঞানবান্ না হইলে কর্ত্তা হ'ন না, সর্ব্বজ্ঞ বলিয়া তিনি কর্ত্তা। মহাশক্তির সেই অচিদংশে যে শুদ্ধবিদ্যা তিনি উপাসকের প্রতি অসীম কৃপার আশ্রয়, যে কৃপা হইতে জীবন্মুক্তি লাভ হয়।

উহারই যে অচিদংশ মায়া তাহা নিজঘ্বঙ্কার (নিগ্রহেচ্ছার) আশ্রয় এই দুই ভাব পরিস্ফুট করিবার জন্য একই বস্তুকে কার্য্যভেদে ভিন্ন রূপে প্রদর্শন করা হইয়াছে। (মায়াতে কৃপাও আছে বটে, কিন্তু তাহা নিম্ন অধিকারীর কামনা পূরণের জন্য তাহাতে বন্ধন দূর হয় না)। পঞ্চভূতের পঞ্চীকরণ স্বীকার করা আছে কিন্তু পঞ্চতন্মাত্র স্বীকৃত হয় নাই। অভাব ভাবেরই আশ্রিত অবস্থা ভেদমাত্র, এইজন্য তাহাকে পৃথক্ পদার্থমধ্যে গণ্য করা হয় নাই।

এইভাবে প্রমাণ-প্রমেয় অবগত হইতে হয়, ইহা জানিয়া সাধক অধিকারানুসারে গুরূপদেশ লাভ করিয়া সাধনা করিলে, উত্তমাধিকারীর জীবন্মুক্তি ও দেহবিলয়ের সহিত আত্যন্তিক মুক্তি, তদপেক্ষা ন্যূনাধিকারীর ব্রহ্মলোক-ভোগ তদন্তে আত্যন্তিক মুক্তি। তদপেক্ষা ন্যূনাধিকারীর পক্ষে পতনযুক্ত ব্রহ্মলোক-ভোগ, বরুণাদি লোক ও পিতৃলোক নামক স্বর্গভোগ হয়, পুণ্যক্ষয়ে তাঁহাদিগের পতন হয়। সাধনা-বিহীন হতভাগ্যগণের দুর্গতি হইয়া থাকে,—এ বিষয়ে শাস্ত্রীয় প্রমাণসমূহ ভাষ্যমধ্যে আছে।

এক্ষণে আপত্তি এই যে, চিদচিদুভয়াত্মক ব্রহ্মস্বীকারে শ্রুতিবিরোধ হয়। মুণ্ডক (২।২) শ্রুতিতে আছে 'বিরজং ব্রহ্ম নিষ্কলম্' ; নিষ্কল শব্দের অর্থ 'অংশরহিত'। যদি চিৎ ও অচিৎ প্রকৃতি ও পুরুষ দুই লইয়া 'ব্রহ্ম' ইহা যদি বলিতে হয় তাহা হইলেই অংশ স্বীকার করা হয়। ইহার উত্তর, শ্রুতিতেই (ছান্দোগ্য ৪অঃ। ৫খণ্ড) প্রাপ্ত হওয়া যায়—'চতুষ্কলং পাদং ব্রহ্মঃ প্রকাশবান্নামোপাস্তে' ইত্যাদি। ব্রহ্ম চতুষ্পাদ, প্রত্যেক পাদে চারি কলা প্রথম পাদের নাম প্রকাশবান্ ইহার উপাসনার ফল বলা হইয়াছে। ভাবার্থ ব্রহ্ম ষোড়শকল। এক শ্রুতিতে তাঁহাকে নিষ্কল বলা হইয়াছে, অপর শ্রুতি তাঁহাকে ষোড়শকল বলিতেছেন,—কলা যদি ক্ষুদ্র অংশেরই নাম হয়, ব্রহ্মের সেইরূপ অংশ শ্রুতিরই স্বীকৃত, সুতরাং বিরোধ হয়। অতএব কলা শব্দের অর্থ পৃথক্ বলিতে হয়, নিষ্কল শব্দের মধ্যে যে কলা তাহা অবয়বের অংশ, ব্রহ্ম নিরবয়ব বলিয়াই

তাহাতে সেইরূপ কলা নাই। আর যে শ্রুতি তাঁহাকে চতুষ্পাদ ও ষোড়শ-কল বলিয়াছেন তাহাতে পাদ ও কলা অবয়ব বা তাঁহার বাস্তব অংশ নহে—কল্পিত অংশমাত্র। যেমন 'পূর্ব্বাকাশ অরুণরাগে রঞ্জিত'—'পশ্চিম গগনে সূর্য্য ঢলিয়া পড়িলেন।' ইত্যাদি ব্যবহার স্থলে অখণ্ড আকাশের পূর্ব্ব-পশ্চিম নামে খণ্ড করা অসম্ভব হইলেও ঐরূপে কল্পনা করা হয়,—সেইরূপ কলা ও পাদ কল্পিত মাত্র। বাস্তবিক সর্ব্বব্যাপকের অবয়ব হইতে পারে না। চিদচিদ্‌ভয়ের মিলন হইলেও তাহাতে অবয়ব-অবয়বিভাব নাই। যেমন আকাশ ও আলোক উভয়ের মিলন হইলেও তাহাতে অবয়বাবয়বি-ভাব নাই সেইরূপ। চিৎ—অখণ্ড নিত্য ব্যাপক নির্ব্বিকার জ্ঞানস্বরূপ পুরুষ, অচিৎ—প্রকৃতিও নিত্য সর্ব্বব্যাপক, কিন্তু সবিকার ও জড়। দুইটি সর্ব্বব্যাপকের নিত্য সম্বন্ধ থাকিলেও অবয়বাবয়বি-ভাব নাই। এই সম্বন্ধের শ্রুতিসঙ্গত নাম 'বল'। ন্যায়-বার্ত্তিককার ভারদ্বাজ মুনি উদ্যোতকরের মতে স্বীকৃত জীব ও ঈশ্বরের যেমন নিত্য সংযোগ, তাহার ন্যায় এই সম্বন্ধ।

পূর্ব্বে বলিয়াছি ব্রহ্ম সাকারও হইতে পারেন। প্রমাণ 'সহস্রশীর্ষা-পুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ' এই বেদমন্ত্র আরও আছে 'তস্যৈষ আত্মা বিবৃণুতে তনুং স্বাং' অর্থাৎ তাঁহার সহস্র মস্তক, সহস্র চক্ষুঃ, সহস্র চরণ, 'তিনি'—যাহাকে বরণ করেন (কৃপা করেন) তাহার সমীপে নিজ শরীর প্রকট করেন। নিরাকার শ্রুতির মীমাংসা এই—জীবগণের শরীর বা ইন্দ্রিয়াদির ন্যায় তাঁহার শরীর বা ইন্দ্রিয়াদি নহে। এই শরীর ভক্তের প্রতি অনুকম্পাবশে লীলা-গৃহীত এবং স্বেচ্ছামাত্রে পরিবর্ত্তনীয়; এইভাবের বর্ণ ও শরীরাদি তাঁহার আছে, শ্রুতিতে সেই কারণে তাঁহার শরীর বর্ণিত। একই তিনি স্বরূপে নিরাকার ও লীলায় সাকার। অতএব চিদচিদ্ ব্রহ্মবাদ এবং তাঁহার নিরাকার ও সাকার-বাদ অযুক্তিযুক্ত নহে, প্রত্যুত প্রমাণসিদ্ধ।

(ইহা মূলের যথাযথ অনুবাদ নহে, ন্যূনাধিক্য আছে, ভাবের ভাষান্তর মাত্র।)

শাক্তবাদ সারের ভাবানুবাদ সমাপ্ত।

———

१। **ब्रह्मसूत्रशक्तिभाष्यम्**—प्रथमाध्यायः, मूल्यमेकरूप्यकम्।

२। **ब्रह्मसूत्रशक्तिभाष्यम्**—द्वितीयाध्यायाद् ग्रन्थसमाप्ति-पर्य्यन्तम्, मूल्यं सार्द्धैकरूप्यकम्।

३। **ब्रह्मसूत्रशक्तिभाष्यम्**—सम्पूर्णम्, मूल्यं सार्द्धरूप्यकद्वयम्।

[प्राप्तिस्थानम् ४७ हालदारपाड़ारोड, कालीघाट (कलिकाता) श्रीयुक्त गुरुपद हालदार सरस्वती-भवनम्।]

४। **सटीकम् अमरमङ्गलम्**—मूल्यं छात्राणां रूप्यकमेकम्, तदन्येषां रूप्यकद्वयम्।

५। **सर्व्वमङ्गलोदयम्** (टीकावङ्गानुवादसहितम्) } मूल्यमेकरूप्यकम्।

[प्राप्तिस्थानम् पो० भाटपाड़ा जिला २४ प्रगणा श्रीयुक्त श्रीजीवन्यायतीर्थ-भवनम्।]

Published by Srijib Nyayatirtha, M. A.,
Bhatpara, 24 Parganas and
Printed by A. Bose, at The Indian Press, Ltd.,
Benares-Branch.